॥ ओ३म् ॥

कालः पचति भूतानि
कालः संहरते प्रजाः।
कालः सुप्तेषु जागर्ति
कालो हि दुरतिक्रमः॥
( चाणक्य-नीति )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत - संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥

न पश्यति च जन्मान्धः
कामान्धो नैव पश्यति।
न पश्चति मदोन्मत्तो
ह्यर्थी दोषान् न पश्यति॥
( चाणक्य-नीति )

卐 वर्षम्-८ 卐 अंकः-१४ (१८२) 卐 १६ जनवरीः २०१९ तः ३१ जनवरीमासः २०१९ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११९ 卐 पृष्ठम्-८

## पुस्तकेनैव भविष्यति जीवनस्य वास्तविकोऽनुभवः-प्रकाशजावड़ेकरः

नवदेहली। केन्द्रियमानवसंसाधनमंत्री प्रकाशजावडेकरः उक्तवान यत् जीवनस्य वास्तविक अनुभवः पुस्तकेनैव भवति। पुस्तके जनानां रूचि अस्ति। पुस्तकमेलायाः विशिष्टातिथि शारजाह क्षेत्राय उक्तवती यत् अत्र मम पुरातन मित्रता वर्तते। तत्र प्रायसः




अनेन उचित अनुचितस्य ज्ञानं भवति। अस्य सुगन्धः सम्पूर्ण वातावरणं सुगन्धितः करोति।

जावेडकरः प्रगतिमैदानस्य हंसध्वनिथिएटरे सप्तविंशति विश्वपुस्तकमेलायाः शुभारम्भ समये उक्तवान्। विशिष्टातिथिरुपे युएई शारजाहक्षेत्रस्य राजकीयसम्बन्धविभागस्य कार्यकारीअध्यक्ष शेखफहीमबिनसुल्तानअलकासिमी उपस्थित आसीत्। "दिव्यांगजनानां पठनआवश्यकता" विषये जावड़ेकरः उक्तवान यत् प्रगतिमैदानस्य जीणोद्धारकार्यं प्रचलति। अस्मिन् समये बहुसंख्यक जनाः अत्र सन्ति। अनेन सिध्यति यत् इदानींतनसमयेऽपि विंशति लक्ष्याधिक भारतीय निवसन्ति। तां प्रधानमंत्री महोदयस्य "एग्जामवारियर्स" पुस्तकमपि दत्तवान।

शुभारम्भ समये राष्ट्रियपुस्तकन्यासस्य अध्यक्ष बलदेवभाईशर्मा, निदेशक रीताचौधरी, शारजाहपुस्तकप्राधिकरनस्याध्यक्ष अहमदबिनरक्कद अलअमेटी ऑलइण्डियाफेडरेशन ऑफदफ्लाइंड महासचिव पदमश्री जे एलकौल सहित भारतीयव्यापारसंवर्धनपरिषदस्य अधिकारी एवं अन्य जनाः उपस्थिता आसन्। अत्र ब्रेललिपि इत्यस्य पुस्तकानां कौटलौगस्य विमोचनमपि अभवत्।

## संतजनानां समक्षे मन्दिरनिर्माणहेतवे योगी शपथग्रहणं कृतवान्



प्रयागराज। अयोध्यायां सर्वोच्चन्यायालये राममन्दिर अग्रिमतिथि प्रप्यानन्तरं कुभे मुख्यमंत्री आदित्यनाथः संतजनानां हृदये स्वस्थानं स्थापितवान। त्रीणां अखडायां धर्मध्वजायाः आरोहणं कृतवान एवं संतजनेन सह वार्तालापं कृतवान। अखाड़ापरिषदस्याध्यक्ष महंत नरेन्द्रगिरि उक्तवान यत् मुख्यमंत्री उक्तवान यत् मन्दिरस्य निर्माणं वयमेव करिष्यामः। प्रथमावसरे मुख्यमंत्री कुम्भे धर्मध्वजायाः आरोहरणं कृतवान। अस्मिन्नवसरे जयश्रीराम एवं हर-हर महादेवस्य उद्घोषोऽपि अभवत्। मुख्यमंत्री सर्वप्रथमं जगद्गुरू रामानन्दचार्येनसह हनुमानमन्दिरे गत्वा पूजाअर्चना कृतवान। तत्र दिगंबरअनी, निर्मोहीअनी एवं निर्वाणीअनी अखाड़ायां गत्वा धर्मध्वजापूजनमेवं आरोहणं कृतवान्। तदुपरान्त शिविरेषु गतवान। तत्र संतजनेन सह मिलित्वा वार्तालापं कृतवान्।

## पञ्चाशन्नगरेषु पञ्चशत-पतञ्जलिपरिधानस्य स्थापना भविष्यति-बाबारामदेवः

हरिद्वार। पतंजलि योगपीठ फैशन उद्योगस्य कार्यं करोति। हरिद्वारे पतञ्जलिपरिधान-आपणस्योद्घाटने बाबारामदेवः उक्तवान यत् प्रथम चरणे पञ्चाशत् नगरेषु पञ्चशतं आपणस्य स्थापना भविष्यति। अस्य परिधानस्य मुख्य त्रि रूपमस्ति आस्था, संस्कार एवं लिवफिट आस्थायाः अन्तर्गत महिला परिधान, संस्कारेषु पुरूष एवं लिवलिटे स्पोर्ट एवं योग सम्बन्धि भविष्यति। पतंजलि योगपीठस्य चतुर्विंशति स्थापनादिवसस्योपलक्ष्ये पतंजलिपरिधान आपणस्योद्घाटनोपयन्त पत्रकारसमक्षे बाबारामदेव उक्तवान्।



## संस्कृतस्य भण्डारेण सम्पूर्णविश्वं परिचितं कारयिष्यामः

कुरूक्षेत्र। कुरूक्षेत्रविश्वविद्यालये पांडुलिपि संसाधनमेवं संरक्षणकेन्द्र माध्यमेन राष्ट्रियपाण्डुलिपिमिशन एवं मिलेनियम ईंडियाएजुकेशन फाउंडेशनस्य द्वादसदिवसीय कार्यशाला मंगलवासरे सुसम्पन्ना।

विश्वविद्यालयस्य पांडुलिपिसंसाधनमेवं संरक्षणकेन्द्रस्य निदेशक डॉ. सुरेन्द्र मोहनमिश्र उक्तवान् यत् काश्मीर पांडुलिपि व शारदापांडुलिपि विषये आयोजित कार्यशालायां मुख्यातिथि हरियाणा कौशलविश्वविद्यालयस्य कुलपति डॉ. वृजकिशोरकुठियाला, माखनलालचतुर्वेदी पत्रकारितराष्ट्रिय विश्वविद्यालयभोपाल एवं सलाहकार उच्चशिक्षाविभागहरियाणा, डॉ. कीर्तिकान्त शर्मा, इन्दिरागांधीराष्ट्रियकलाकेन्द्र, सारस्वतातिथि डॉ. दीपकशर्मा कौशलविकास कर्मकारी अधिकारी, डॉ. मनोजजोशी पुस्तकालयाध्यक्ष, डॉ. सुषमादेवीगुप्ता जम्मुविश्वविद्यालय उपस्थिता आसन्।




कार्यशालायां संस्कृतजगति उपलब्ध ज्ञानभण्डारेण परिचयितुं सम्पूर्णभारतवर्षे संस्कृतशिक्षां संस्कृतमाध्यमेन अध्यापनाय एवं लिपि ज्ञान प्रदातुं सर्वे सहमति दत्तवान्तः। कार्यक्रमे डॉ. ईश्वरचन्द्रमित्तल, डॉ. वृजमोहनशर्मा, डॉ. अरूणेश्वरझा, डॉ. राजेश्वर प्रसादमिश्र, डॉ. कृष्णारँगा, डॉ विभाअग्रवाल, डॉ. ललितकुमारगौड़ डॉ. स्वर्णप्रभा आसन्।

ओ३म्
भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| ● प्रचार संस्करण (अजिल्द) 23×36÷16 | मुदित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| ● विशेष संस्करण (सजिल्द) 23×36÷16 | मुदित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| ● स्थूलाक्षर सजिल्द 20×30÷8 | मुदित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति सत्यार्थ प्रकाश के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

# अनुभविशीलादीक्षितं कांग्रेसः पुनः दिल्लीप्रदेशस्य अध्यक्षरुपेण चितवान्



नवदेहली। पुनरेकवारं पूर्वमुख्यमंत्री ८० वर्षीय शिलादीक्षितस्योपरि विश्वासः कृतवान। तां दिल्ली प्रदेश कांग्रेसस्य नूतनाध्यक्ष नियुक्त कृतवान। कांग्रेसस्य राष्ट्रियाध्यक्ष राहुलगाँधी लोकसभा चुनावस्य कारणेन मध्यप्रदेश राजस्थानवत् देहल्यामपि अनुभवं महत्वं दत्तवान। प्रदेशप्रभारी पी.सी.चाको शिलादीक्षितस्य नामस्य घोषणा कृतवान। शिलादीक्षितं संगठनस्य कार्ये सहयोगाय पूर्वमंत्री हारूनयुसुफ, पूर्वविधयक देवेन्द्रपाल एवं पूर्वप्रदेशयुवक कांग्रेसाध्यक्ष राजेशलिलौठियां कार्यकारी अध्यक्ष रूपे चयनितं कृतवान।

ज्ञातोऽस्ति यत् श्रीमती शिलादीक्षित विंशति वर्षोपरान्त पूनः अध्यक्ष रूपे आगतवती। विश्वासोऽस्ति यत् तासां सहयोगेन कांग्रेस देहल्यां सत्तायां आगमिष्यति। तां अध्यक्ष रूपे चयनितं भवनेन समस्त कांग्रेस नेतारः एवं कार्यकर्तारः शुभकामना दत्तवन्तः।

# विश्वपुस्तकमेलायां त्रिंशत् किलोग्रामस्य वेदपुस्तकम्

नवदेहली। सप्तविंशति विश्वपुस्तकमेलायां प्रयसः नव लक्ष पुस्तकप्रेमी भागं गृहीतवन्तः। पुस्तकस्य लोकर्पणं अस्य द्योतकोऽस्ति यत् दूरवाणि एवं संगणकस्योपरान्त पुस्तकस्य स्व महत्वमस्ति। मेलायां यत्र देश व विदेशतः समागत प्रकाशकानां उपस्थितिः आसीत् तत्रैव त्रिंशत् किलोग्रामस्य वेदपुस्तकम् आकषर्णस्य केन्द्रः आसीत्। चतुर सहत्र चत्वारिंशत् पृष्ठात्मकं पुस्तकमिदं चतुर्णां वेदानां तेलगु अनुवादः आसीत्। तेलंगानायाः डॉ. रामकृष्णरेड्डी अनुवादं कृतवान। तेषामनुसारेण् तं तेषां गुरू गोपदेवशास्त्री वेद एवं शास्त्रस्य शिक्षा दत्तवन्। देहल्यां यदा ते विद्यावारिधि करणार्थं आगतं तदा स्वामी जगदीशश्वरानन्दः अनुवाद करणार्थं प्रेरितवान। ते पञ्चदशलक्ष धनं व्ययं कृतवान अस्मिन् पुस्तकोपरि। एकस्य चतुर्विंशति सहस्त्र रूप्यकाणि सन्ति।


## राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्, गुणवत्ताप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितम्)

56-57, संस्थागतक्षेत्रम्, जनकपुरी, नवदेहली -110 058

## संस्कृत सीखने के लिए पत्राचार पाठ्यक्रम (२०१८-२०१९)

मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन **राष्ट्रिय संस्कृत संस्थान** (मानित विश्वविद्यालय) द्वारा पत्राचार माध्यम से संस्कृत सीखने के लिए द्विवर्षीय संस्कृत पाठ्यक्रम चलाया जा रहा है। एक वर्ष के लिए पाठ्यक्रम शुल्क 500/-रू. भारतीय नागरिकों के लिए तथा 50$ (50 यू.एस. डॉलर) विदेशी नागरिकों के लिए है। शुल्क डिमाण्ड ड्राफ्ट द्वारा **'कुलसचिव, राष्ट्रिय संस्कृत संस्थान** (मानित विश्वविद्यालय)' के नाम से भेजा जा सकता है। आवेदन पत्र संस्थान की वेबसाइट पर उपलब्ध है। शुक्ल सहित आवेदन पत्र प्राप्ति पर नामांकन किया जाएगा। तथा पाठ्यसामग्री अध्ययनार्थी को डाक द्वारा भेजी जाएगी। पूरित आवेदन पत्र **सहायक निदेशक,** पत्राचार पाठ्यक्रम, **राष्ट्रिय संस्कृत संस्थान** (मानित विश्वविद्यालय) 56-57, इन्स्टीटयूशनल एरिया, नई दिल्ली-110058 को भेजना सुनिश्चित किया जाए। विस्तृत विवरण के लिए कृपया संस्थान की वेबसाईट www.sanskrit.nic.in. पर अवलोकन करें। सम्पर्क टेलीफोन नं. 011-28521994, 28524993, 28524995 - एक्सटेंसन नं. 252, 237

**कुलसचिव (प्र.)**


# दशम् द्वादश कक्षयो वेदशिक्षणं भविष्यति

भारतीय वैदिक परम्परां लोकप्रिय निर्मातुं सर्वकारः कार्यं कृतवान। अनेन कोऽपि छात्रः कला, विज्ञानमेवं वाणिज्य संकाय तथा वेद संकायेऽपि दसम् एवं द्वादस कक्षायाः अध्ययन कर्तुं शक्यते। अत्र सर्वे विषयाः वेद सम्बन्धि भविष्यति। इदानीं अस्मै केवलं दसम् कक्षायाः अध्ययनं प्रचलने आगतं परञ्च श्रीघ्रमेव द्वादस कक्षायाः नामांकनमपि भविष्यति। वेदाध्ययनं अग्रे सारितुं मा.सं मंत्रालयस्य ऑनलाईन संस्था राष्ट्रियमुक्तविद्यालयीयसंस्थानम् कृतवान। अस्य पाठ्यक्रमस्य नाम भारतीयज्ञानपरंपरा दत्तवान। अत्र भाषा संस्कृतं भविष्यति एवञ्च विषयेषु भारतीयदर्शन, वेदाध्ययनम्, संस्कृतव्याकरणमेवं संस्कृतसाहित्य भविष्यति। एनआइओएस अध्यक्ष डॉ. सीवीशर्मा उक्तवान यत् एतत्सर्वं भारतवर्षस्य प्रसिद्ध वेदाध्ययनकेन्द्रस्य विद्वद्जनानां मार्गदर्शने अभवत् अनया छात्र उच्चशिक्षा अपि प्राप्तुं शक्यते।

अस्मिन् विषये भारतीयसंस्कृत्या सम्बन्धित देशोऽपि रूचि प्रदर्शितवान तेषु मरीशस, फिजी, ट्रिनिडाड एवं टोबैगो सदृश देश अस्ति। इदानी एनआईओएस अत्रापि अस्याः संस्थायाः संस्थापनाय निवेदनं कृतवान।

# प्रत्येकं महाविद्यालये इलेक्टोरललिट्रेसीक्लब इति घटितं भविष्यति

भोपाल। भारतं निर्वाचनम् आयोगस्य निर्देशानुसारं मतदाता जागरूकता अभियानस्य अंतर्गतं प्रत्येकस्मिन् महाविद्यालये इलेक्टोरल लिट्रेसी क्लब (ELC) इत्यस्य गठनं कारयिष्यते। निर्वाचनं साक्षरतायै छात्र-छात्राः च मतदाता जागरूकतया संबंधितम् अभियानम् एवं गतिविधीनां क्रियान्वयनाय सज्जं कारयिष्यते। एतद् क्लब महाविद्यालये एवं छात्र - छात्राः स्वकीयं निवासम् अरितः परितः सम्पूर्णं वर्षे मतदाता जागरूकता गतिविधीन् संचालिताः करिष्यन्ति।

महाविद्यालयस्य प्राचार्याः क्लब संरक्षकाः भविष्यन्ति। प्रत्येकस्यां संस्थायाम् एतस्मै कार्याय द्वि शिविरे एम्बेसेडर छात्र - छात्राणां नियुक्तिः कारयिष्यते। सर्वाः संस्थाः निर्देशिताः कृताः यत् अष्टादश वर्षात् अधिकम् आयुकालस्य समस्तानां छात्र - छात्राणां मतदाता परिचयं पत्रं निर्मीय वितरितं करणं सुनिश्चितं कुर्युः। महाविद्यालयस्य प्रत्येकः छात्रः स्वकीयं निवासस्य अरितः परितः दश दश गृहेषु गत्वा मतदाता जागरूकता संबंधी प्रचारं प्रसारं करिष्यन्ति च अष्टादश वर्षस्य आयुकालात् अधिकस्य जनाः येषां परिचयं पत्रस्य निर्माणं नैव अभवत्, तेषां परिचयं पत्रं निर्मातुं सहयोगं करिष्यन्ति। छात्रैः अष्टादश वर्षात् अधिकम् आयुकालस्य येषां जनानां परिचयं कारयिष्यते, तेषां सूची निर्मीय महाविद्यालयान् दास्यन्ति। एतादृशाः छात्राः, ये व्यवहारिकं प्रयासं कृत्वा सफलतापूर्वकं सूच्याः निर्माणं कृतम्, तेभ्यः महाविद्यालयः च जिला स्तरे पुरस्कारं च प्रशस्ति पत्रं प्रदानं कृत्वा सम्मानिताः कारयिष्यते। अस्मिन् अभियाने एनएसएस, एनसीसी च क्रीडा विभागस्य छात्र छात्राणाम् अपि सहयोगं नेष्यते।

प्रतियोगिताः पञ्चदश जनवरी मासात् आरम्भाः भविष्यन्ति

नवमः राष्ट्रीयः मतदाता दिवसः समारोहे महाविद्यालयः च जिला स्तरम् एवं संबंधितः विश्वविद्यालयेन वादं विवादं, निबंधं, चित्रकला च स्लोगन प्रतियोगितायाः आयोजनं क्रियते। एताः प्रतियोगिताः पञ्चदश जनवरी मासात् द्वाविंशतिः जनवरी मासं 2019 वर्षं पर्यन्तम् आयोजिता कारयिष्यते। प्रत्येकं स्तरे प्रत्येका विधायां प्रथमं च द्वितीयं स्थानं प्राप्ताः चयनिताः विद्यार्थिणः प्रत्येकस्मात् विश्वविद्यालयात् अधिकतमाः अष्ट छात्र - छात्राः राज्यं स्तरीया प्रतियोगितायां सम्मेलिताः भविष्यन्ति।

# शिक्षकाः विद्यार्थिनाम् आदर्शाः भवन्तिः- राज्यपालः श्रीमती पटेलः

भोपाल। राज्यपाला श्रीमती आनंदी बेन पटेलः तात्या टोपे नगरे स्थितः शासकीयः कमला नेहरूः उच्चतरं माध्यमिकं विद्यालयस्य पुस्तकं वितरणं कार्यक्रमे शिक्षिकाः छात्रान् च अवदत् यत् अहं शिक्षिका आसम् अतएव शिक्षायाः शिक्षकाणां च पुस्तकानां महत्वं जानानि अतएव वारं वारं मम सर्वेभ्यः आग्रहं भवति यत् बालिकानां पठनम् आवश्यकम् अस्ति। चेत् बालिकाः पठिष्यन्ति तर्हि आत्मनिर्भराः भविष्यन्ति, उत्तमाः मातरः भविष्यन्ति च देशस्य विकासे स्वकीयं योगदानम् अपि दास्यन्ति।

राज्यपाला छात्राभ्यः अवदत् यत् नव वर्षस्य आयुः पर्यन्तं बालानाम् अशीतिः प्रतिशतम् मानसिकं विकासं भवति। शेषं विंशतिः प्रतिशतं विकासम् आगामी आयुकाले। प्राथमिकी शिक्षिका सर्वदा छात्राणां स्मृतिषु भवति। सैव तस्या आदर्शा अपि भवति। प्राथमिकी शिक्षकाय अस्मिन् विषये सजगः भूत्वा स्वकीयं शिक्षणं कार्यं करणीयम् तथा उक्तं यत् विद्यार्थीणां शारीरिकं मानसिकं च आर्थिकी स्थितिना सह सह तस्य परिवेशस्य विषये शिक्षकं विवरणम् आवश्यकं भवति। तदैव तस्य बालस्य काठिन्यताः अवबोध्य तस्य सर्वांगीणं विकासं प्रति इतोऽपि ध्यानं दातुं शक्ष्यामः। तस्य समस्यायाः समाधानं करिष्यामः। श्रीमती पटेलः शिक्षिकाभिः कथितवती यत् पाठनाय पठनम् आवश्यकं भवति। ताः स्वकीयं विषये विशेषज्ञतया सह अन्यानि रुचिकराणि च सामान्यं ज्ञानवर्धनस्य पुस्तकानि अपि पठेयुः, येन ताः विद्यार्थिणः शोभनं रूपेण पाठयेयुः। सा विद्यालयस्य प्राचार्याम् अवदत् यत् छात्राणां हीमोग्लोबिन परीक्षणम् अवश्यं कारयेयुः च एनीमिक छात्राणां परिचयं कृत्वा तासाम् समुचितम् उपचारं कारयेयुः।

राज्यपाला कक्षा प्रथमा तः चतुर्थी पर्यन्तं छात्राभ्यः चित्रांकनस्य पुस्तकानि च वर्णानि प्रदानं कृतवती। सा कक्षा नवमी दशम्याः छात्राभ्यः मनोरंजनस्य पुस्तकानि ददन्ती अवदत् यत् या छात्रा सम्पूर्णं वर्षे सर्वाधिकं पुस्तकानि पठिष्यन्ति, तस्यै आगामी वर्षे अहं पुरस्कारं दास्यामि। अस्मिन् अवसरे सा विद्यालयस्य संगीतं कक्षः, चित्रकला कक्षः एवं विज्ञानस्य प्रयोगशालानाम् अवलोकनं कृतवती। सा विद्यालयस्य द्वयोः छात्रयोः तयोः अद्य जन्म दिवसे आशीर्वादं स्वरूपम् उपहारं दत्तवती। अस्मिन् अवसरे सा भोपाले नव अक्टूबर मासे आयोजितः पठाम् भोपालं कार्यक्रमस्य विवरणं कुर्वन्ती अवदत् यत् सर्वाः शिक्षिकाः च विद्यार्थिणः सप्ताहे द्वयोः दिवसयोः रुचिकरं पुस्तकानि अवश्यं पठनीयम्, येन मस्तिकस्य उचितं विकासं भवेत्।

समारोहे विद्यालयस्य छात्राः सरस्वती वंदना एवं स्वागतं गीतं प्रस्तुतं कृतवत्यः। छात्राः विद्यालये पठनं प्रारम्भात् पूर्वे भूयमानाः नियमिताः कार्यक्रमाणाम् अंतर्गतं अद्यतन पंचागम्, अद्यतन सुविचारं च अद्यतन प्रमुखानां समाचाराणां वाचनम् अकुर्वन्।

# मकरसङ्क्रान्तिः

-डॉ. रमाकांतशुक्लः

शिशिर-संत्रास-संहत्री मकरसङ्क्रातिरायाता।
मनःसूत्साहजनयित्री मकरसङ्क्रातिरायाता ।।1।।
महात्मानः प्रयागे कुम्भमेलासंगमे स्नातुम्।
सशोभायानमायाताः मकरसङ्क्रातिरायाता।।2।।
जनाञ्ज्योतिर्नयति तमसो नयति सच्चासतो या सा।
नृणामुपकारसन्धात्री मकरसङ्क्रातिरायाता ।।3।।
मृगे मृगलाञ्छनादित्यौ प्रविष्टौ लोकसौख्यकरौ ।
पितामहतृप्तिसन्दात्री मकरसङ्क्रातिरायाता।।4।।
मृगे = मकररासौ
जनाः श्रद्धायुता आतन्वते तीर्थेषु निस्तन्द्राः।
जपं दानं तथा स्नानं मकरसङ्क्रातिरायाता ।।5।।
जना अलसा अपि प्रातः समुत्थायाभिषेकार्थम्।
प्रयागे सङ्गमं प्राप्ता मकरसङ्क्रातिरायाता ।।6।।
त्रिवेणी-सङ्गमे स्नात्वा जना अपुनर्भवादिकृताः।
त्वमप्येहीह मनसा द्राङ् मकरसङ्क्रातिरायाता ।।7।।
सतिल-गुड-गोलिकास्तिलमोदकान्तिवसर्करा-पट्टीः।
श्वशुरहेतोर्ददति वध्वो मकरसङ्क्रातिरायाता ।।8।।
क्वचिद्पौषादि पर्वास्ते क्वचित्सङ्क्रान्ति पर्वास्ते।
क्वचिच्चेयं मता लोह्डी मकरसङ्क्रातिरायाता।।9।।
बिहूपर्वासमे सम्मान्यते नृत्यज्जनैः समुदम्।
कृज्ञिः सफला भवेत्तेषां मकरसङ्क्रातिरायाता ।।10।।
गृहाण्निज्कासितं कर्नाटकेष्वान्ध्रेषु नरनार्यः।
दहन्ति व्यर्थसम्भारं मकरसङ्क्रातिरायाता।।11।।
जना बङ्गप्रदेशे यान्ति गंगासागरे स्नातुम्।
कपिलमुन्याश्रमक्षेत्रे मकरसङ्क्रातिरायाता।।12।।
जनाः पञ्चाम्बुराज्ये भङ्गडां गिद्दां प्रकुर्वाणाः।
ददत्यनलाय नैवेद्यं मकरसङ्क्रातिरायाता ।।13।।
प्रसिद्धं सुन्दरी-मुँदरी-कथाख्यानं प्रगायन्तः।
गृहद्वारे स्थिता बालाः मकरसङ्क्रातिरायाता ।।14।।
पतङ्गा उत्तरायणपर्वमानयितुं नभोङ्गणगाः।
सुरम्ये गुर्जरप्रान्ते मकरसङ्क्रातिरायाता ।।15।।
तमिलनाडुप्रदेशे पोङ्गलस्यास्ते महामहिमा।
त्रिभिर्दिवसैः समायोज्या मकरसङ्क्रातिरायाता ।।16।।
विकर्तनपूजनं सगधिः पशूनां स्नानश्रृंगारौ।
विधीयन्तेऽत्र सानन्दं मकरसङ्क्रातिरायाता।।17।।
वधूर्हरियाणदेशीयाः प्रसादयितुं निजौश्वशुरौ।
समं वाद्यैः प्रयातीयं मकरसङ्क्रातिरायाता ।।18।।
चकट-चकटा-कृते तिल-तण्डुलान् प्रक्षिप्य मोदन्ते।
गृहाङ्गणमध्यगा नार्यौ मकरसङ्क्रातिरायाता।।19।।
कुरुक्षेत्रे हरिद्वारे नरो न्यत्तीर्थभागे वा।
समीडन्ते रविं स्नात्वा मकरसङ्क्रातिरायाता।।20।।
न यो यातुं समर्थः कुम्भमेलायां प्रयागे सः।
गृहे कुरुतात् परोपकृतिं मकरसङ्क्रातिरायाता ।।21।।
तिलस्पर्शं शिरशि कृत्वा जनाः ब्राह्मे मुहूर्ते वै ।
बिहारे स्नान्ति सश्रद्धा मकरसङ्क्रातिरायाता ।।22।।
उदीच्यां वाप्यवाच्यां वा प्रतीच्यां चाप्यथो प्राच्याम् ।
नवोत्साहन वितन्वाना मकरसङ्क्रातिरायाता ।।23।।
समेषां कामनाः सफला भवेयुः कार्यलग्नानाम्।
समेषां मंगलं भूयात् मकरसङ्क्रातिरायाता।।24।।
त्यजालस्यं भजोत्साहं सुकर्मन्यस्तचित्तस्सन्।
रमाकान्त! प्रसन्नः स्या मकरसङ्क्रातिरायाता।।25।।

# दिव्यकुम्भः



**डॉ. राजेन्द्रत्रिपाठी रसराजः**
प्रयागराजः

दिव्यकुम्भोत्सवः सङ्गमे शोभते।
तीर्थराजे प्रयागे मनो मोदते।1।

आगता दूरदेशात्तु वैदेशिकाः ।
भारतीया धरा पावनी राजते।2।

संस्कृते संस्कृतिर्या प्रतिष्ठापिता।
संस्कृतिर्विश्ववारा ह्यसौ द्योतते।3।

देवदैत्याः प्रयागेऽद्य चोपस्थिताः।
सङ्गमे स्नानपुण्यामृतं तन्वते।4।

साधुसद्भिश्च नागामहन्तादिभिः ।
कल्पवासः प्रयागे समाराध्यते।5।

नैव जात्यादयो भेदभावादयः।
विश्वबन्धुत्वभावोऽत्र संदृश्यते।6।

दर्शनं पूजनं पापसम्मार्जनम्।
सङ्गमे स्नानपुण्यं जनैर्लभ्यते।7।

मण्डपा हन्त भव्या वितानावृताः।
माघमेला न केभ्यो द्रुतं रोचते।8।

गीत-संगीत-वाद्यैश्च लीलादिभिः।
लोकनृत्यं तु लोकैः समालोक्यते।9।

रात्रिबेलाऽपि विद्युच्छटामण्डिता।
सूर्यचन्द्रद्युतिर्नैव हा दीप्यते।10।

---

# उत्कर्षमापादयन्तु



**प्रो. कमलापाण्डेया**
वाराणसी

क्षीरैर्लोकं विपुल विभवैःकाममावर्धयन्त्यः।
नीरैरच्छैरमलधवलीकुर्वती प्राणिजातम्।
यो लोकानां तिरयति तमोरूपविघ्नानशेषान्।
गावो गंगा गणपतिरथोत्कर्षमापादयंतु।।1।।
वृक्षच्छाया लसतु नगरे ग्राम वन्यप्रदेशे।
लक्ष्मीच् छायाः प्रतिजनगृहे मोदमेवानयन्तु।
स्नेहच्छायाह्यनुभवतु सदा तावदाबालवृद्धः।
गावो गंगा गणपतिरथोत्कर्षमापादयंतु।।2।।
सर्वा नद्यःसुभगसलिलाःसन्तु शश्वत्प्रवाहा।
सर्वा नार्यो मुदितहृदयाःसन्तु सौभाग्यशीलाः।
सर्वा विद्या विविधविषया उल्लसन्तु प्रकामम्।
गावो गंगा गणपतिरथोत्कर्षमापादयंतु।।3।।
ऐक्यं देशे प्रसरतु मते नैव भूयाद्विरोधः।
हिंसा हत्या कलहपरता क्वापि दृश्येत नैव।
भूयाद् मैत्री निखिल जगतिप्राप्य सौहार्दभावम्।
गावो गंगा गणपतिरथोत्कर्षमापादयंतु।।4।।
धर्मो लोकं धरति विमलःसत्वशीलःप्रकामम्।
अर्थश्चैव प्रगतिकर इतिप्रार्थ्यमाणो विभाति।
कामः काम्यःतदनु सुखदःक्वापि लभ्यः तुरीयः।
गावो गंगा गणपतिरथोत्कर्षमापादयंतु।।5।।

# आत्मानं त्रातुमुद्यता गंगा



**डॉ आशुतोषद्विवेदी**
केन्द्रीयविद्यालयः-2
सतना मध्यप्रदेशः

पवित्रा गंगा
असंख्यधर्मानुरागिणामास्था गंगा
हिमालयस्य पुत्री गंगा
स्निग्धा
सुशीतला
सुरम्या गंगा
पितुःहिमालयस्य क्रोडे
सानंदम्
निर्द्वन्द्वम्
निश्छलम्
निर्मलम्
क्रीडन्ती गंगा।
अनंतकोटिविटपानां
हरिकरिवृंदानां
रक्षिका गंगा।
दम्भीप्रस्तराणां
त्रोटिका गंगा।
अविरलगत्या प्रवहन्ती गंगा।
शतशःसहस्रशः
कृषकबन्धूनां
पोषिका गंगा
पितुःपरिधेःबहिरागते सति
कालुष्यैः मालिन्यैः
युक्ता गंगा
स्वात्मानं त्रातुमुद्यता गंगा।

# प्रियतमा निद्रा

निद्रा........
त्वं वल्लभा इव
त्वं गात्रस्य राज्ञी
नेत्रयोः सखी
तवोपस्थित्या
मोमुद्यते मनः
हर्षति हृदयम्
डयते वाञ्छा
त्वं जीवनं चकास्ति
तवाभावे जीवनं शून्यं
वृथा भौतिकीसौख्यं
सारहीनं जगदिदम् प्रतिभासते।
विक्षिप्ताः अनुरागिणः
कृष्णरात्रौ नेत्रे विस्फार्य त्वां चिन्तयन्ति
चिकित्सकानां यौगिकानां परिव्राजकानां शरणं वहन्ति।
चिन्ता तव शत्रुः
तंद्रालस्यञ्च तव बन्धुः
हे प्राणप्रिया! निद्रा
सत्यं त्वं प्रेयसी इव

**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**
**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar, Delhi-110053**
**IFC Code- IOBA0002249**

# सम्पादकीयम्

संस्कृतभाषा सर्वासामपि भाषाणां जननी वर्तत इति वृत्तस्य मूले किमपि वैशिष्ट्यमस्ति। सम्प्रति सर्वैरपि एतदंगीकृतं यत् यो रागः संस्कृते वर्तते नासौ अन्यत्रेति। मन्त्राणां स्वरः पूजापाठाक्रमः किं महतां प्रवचनानि यानि संस्कृतिगिरा गीयन्ते तानि सुदुर्लभान्येव। भारतवर्षस्य सौभाग्यं यदत्र एतादृशी कमनीया भाषा भाष्यते। अस्याः संस्कृतभाषायाः पठनेन किं च अत्र विलिखितसूक्तीनामुपदेशानां चानुशीलनेन मानवानां समुदयो भवति। दैवीगुणदायकं संस्कृतं दैवीवागपि कथ्यते। महाकवीनां वाल्मीकिव्यासकालिदासादीनां रचनाः अस्याः भाषायाः गौरवं वर्धयन्ति। भर्तृहरेः शतकत्रयं न कं जनं संस्कृताध्यनाय आकर्षति। ज्ञानवैराग्यादिप्रदायिनी श्रीमद्भगवद्गीता भारतीयानां कर्मपाठं पाठयति। महाकवीनां प्रकृतिप्रेम मानवेषु सद्भावनामापूरयति।

संस्कृते एकमपि सुवचनं यत् मुनिना दार्शनिकेन वा प्रोक्तं तद् हि जीवने परिर्वतनमानेतुं समर्थमस्ति। कर्मण्येवाधिकारस्ते मा फलेषु कदाचन इति गीतावाक्यं सम्पूर्णमपि विश्वं विमोहयति। सौभाग्येन साम्प्रतं संस्कृतसंस्कृतिविकासनदक्षः सर्वकारो विराजते देशे येन सर्वत्रापि स्वदेशकेतुः ससम्मानमग्रे प्रसार्यते। अहमीश्वरं प्रार्थये यत् शासकाः देशस्य पूर्णरूपेण संस्कृतसंस्कृतिवर्धनकराः भवेयुरिति। येन सर्वत्र सुखं शान्तिः सद्भावनाश्च प्रसरेयुः। इदमेव विलिख्य स्वभावनां प्रकटीकुर्वती सर्वेषां सर्वासामपि मंगलकामनां वाञ्छामि।

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**अग्ने देवाँ इहा वह सादया योनिषु त्रिषु।**
**परि भूष पिब ऋतुना ।।४।।**

अर्थ-दाह गुणयुक्त यह अग्नि अपने रूप के प्रकाश से सब ऊपर-नीचे वा मध्य में रहनेवाले पदार्थों को अच्छी प्रकार सुशोभित करता, होम और शिल्पविद्या में संयुक्त किया हुआ दिव्य-दिव्य सुखों का प्रकाश करता है ।।४।।

ऋतुओं के साथ वायु क्या-क्या कार्य करता है, इस विषय का उपदेश अगले मन्त्र में किया है-

**ब्राह्मणादिन्द्र राधसः पिबा सोममृतैरनु ।**
**तवेद्धि सुख्यमस्तृतम्।५।**

अर्थ-मनुष्यों को योग्य है कि जगत् के रचनेवाले परमेश्वर ने वायु आदि पदार्थों में जो-जो नियम स्थापन किये हैं उन-उनको जानकर कार्यों को सिद्ध करना चाहिए और उनसे सिद्ध किये हुए धन से सब ऋतुओं में सब प्राणियों के अनुकूल हित सम्पादन करना चाहिए। तथा युक्ति के साथ सेवन किये हुए प्राणियों के अनुकूल हित सम्पादन करना चाहिए तथा युक्ति के साथ सेवन किये हुए पदार्थ मित्र के समान होते और इससे विपरीत शत्रु के समान होते हैं ऐसा जानना चाहिए ।।५।।

अब वायुविशेष प्राण वा उदान ऋतुओं के साथ क्या-क्या प्रकाश करते हैं, इस बात का उपदेश अगले मन्त्र में किया है-

युवं दक्ष धृतव्रत मित्रावरुण दूळभम्।
ऋतुना यज्ञमाशाथे।।६।।

अर्थ-जो सबका मित्र बाहर आनेवाला प्राण तथा शरीर के भीतर रहनेवाला उदान है; इन्हीं से प्राणी ऋतुओं के साथ सब संसाररूपी यज्ञ और बल को धारण करके व्याप्त होते हैं, जिससे सब व्यवहार सिद्ध होते हैं ।।६।।

**यह अट्ठाईसवाँ वर्ग पूरा हुआ।**

फिर अगले मन्त्र में  ईश्वर और भौतिक अग्नि के गुणों का उपदेश किया है-

गतांकशेषभागः

# आचार्यवासुदेवद्विवेदिशास्त्रिणां बालसाहित्यम्

संस्कृतप्रचारकार्यसमर्पितान्तकरणो वासुदेवद्विवेदिमहोदयोऽतीवसरलस्वभावो गुरुरसौ विनीतः सहृदयानाम्, दयालुर्दरिद्राणाम्, सरलातिसरलमष्डुसंस्कृतभाषी महतामपि विदुषां सदसि, उदारः शिष्याणाम्, आशुकविः काव्यपीयूषपानकुशलानाम्, संगोष्ठीप्रियो बालमहिलाकविजनानाम्, विपश्चितां माननीयः, रसिकः श्रोता कर्ता च संस्कृतगीतानाम्, रचयिता मधुरहृदयग्राहिकाव्यानाम्, याचको धनपुस्तकानाम्, कोषो वेदशास्त्राणाम्, प्रभावयिता सभासदः, आग्रही सुरभारतीसंरक्षणस्य, अनिच्छुरलंकाराणां देहे न तु काव्ये, समुचितव्यवहारकुशलो दृष्टमात्रेण जनानाम्, यथाकालं प्रहासयिता विदुषः शिष्यान् प्रहसनैः, सदास्मयमानास्यः, सर्वदा शयानोऽपि जागरित एव परिलक्षितो नात्रातिशयोक्तिरिति।[5]

अहो दर्शनीयवपुर्विकसितकमलनयनोऽनल्पोन्नतघोणः, ह्रस्वश्वेतकुन्तलकलापशिरोदेशः, सुन्दरललाटः, चन्द्रमुखः, रक्तिमकपोलः, धवलधौतकंचुकप्रियः, कृष्णपिशंगपादत्राणः, कष्णच्छत्रः, स्थूलोपनेत्रः, वार्धक्येऽपि युवकार्यकारित्वोपेतः, लघुदण्डपाणिः, अप्रयुक्तकंकतिकः, वटुकान्तेवासिभिः यथावकाशं संवाह्यमानचरणोऽपि सुरभारतीं शिक्षमाणो विश्रामावसरे, काष्ठचरणपादुकाप्रियः, व्यतीताशीत्यधिकसंवत्सरोऽपि लेखितुपठितुकामो दुःखितमना कदाचिल्लिखनकाले कम्पमानकरः 'नाधुना करो मदीयो लेखने प्रसर्पतीति' भाषमाणश्चिन्तितो विलोकितः।[6]

असौ हि गुरुवासुदेवः संस्कृतभाषाप्रचारैकरसेप्सुरपि सर्वरसास्वादकुशलः, कृशशरीरोऽपि गीर्वाणवाणीसमुन्नयने कनकभूधराकारशरीरः, बहुभाषाज्ञोऽपि मितभाषी, मुक्तकोषागारोऽपि गृहीतावश्यकवित्तमात्रापरकौत्सः, अकृष्णोऽपि कृष्णकान्तोपेतः, अरागोऽपि कमलारागान्वितः, भारतीनिवासस्थलोऽपि श्रीनिवासाश्रयः, कृष्णपक्षेऽपि निजचरणीकृतशरदिन्दुः, अनभिलषित-मदनारविन्दोऽपि अरविन्दसेवासन्तुष्टः, अशैलहृदयोऽपि शैलेशगुणसमाकृष्टमानसः, श्रद्धेयो गुरुवासुदेवद्विवेदी शास्त्री काश्या भूषणभूतः सम्मतः।[7]

सार्वभौमं प्रति संस्कृतं विलसेदितिधिया संस्थापितं लघुस्थलमपि विस्तीर्णगुरुकुलमिव संस्थानम् अणुपरिमाणमपि सम्पूर्णधरित्रीव्यापकम्, संकुचितावाससमुपेतमपि महदायतनम्, अनेकदेशदेशान्तरवास्तव्यशिष्यध्वनिध्वनितम्, वेदोपनिषदारण्यकपुराणदर्शनकाव्यादिग्रन्थालयम्, यत्र वासुदेवसंचाल्यमानरथ इव वासुदेवारूढसंस्कृतरथो न क्षुण्णाद् विचलितः। काश्यां  देववाण्या यो रथो वासुदेवगुरुणा चालितः, असौ सम्पूर्णमपि भारतभुवं प्रचचाल। संस्कृतदिग्विजयायार्थं निर्गतं रथं न कोऽपि रोद्धुं शशाकेति। असमारुणाचलोत्कलोत्तरप्रदेशानां प्रतिनगरं यत्र संस्कृतकेन्द्राणि तत्र तत्र यात्रा विहिता। कश्मीरगुर्जरदिल्लीनागालैण्डपंचनदबिहारमणिपुर-

मध्यप्रदेशमहाराष्ट्रराजस्थानबंगहरियाणाहिमाचलप्रदेशानां संस्कृतसंस्थानानि मन्दिराणि संस्कृतविद्यालयाश्च संस्कृतदिग्विजयघोषमनवरतं शुश्रुवुरिति। दक्षिणभारतस्यापि बहुषु प्रदेशेषु यथा आन्ध्रकर्णाटककेरलतमिलपाण्डिचेरी-प्रभषतिसंस्कृतस्थलानि संस्कृतरथध्वनिना समाकृष्टानि। प्रतिवैशिदेशो नेपालोऽपि गुरुवासुदेवसंस्कृतदिग्विजयक्षेत्रान्तर्गत एव यत्र संस्कृतरवो गुंजितः। एवम्प्रकारेण अश्रान्तस्सन् आजीवनं सभां संगोष्ठीं सम्मेलनानि समायोजयन् सर्वत्र संस्कृतविमलसलिलधारां प्रवाहयन् संस्कृतसेवाव्रतं पूरयामास। हन्त! स्वविवाहावसरे श्वशुरालयपक्षातः प्राप्तं कनकांगुलीयकमपि संस्कृतपुस्तकक्रयार्थं विक्रीतमनेनेति त्यागो विस्मयं तनोति।

गीर्वाणवाण्या अद्वितीयः संवर्द्धकः संरक्षको गुरुवासुदेवः संस्कृतं सरलं स्यादिति विचिन्त्य सुगमशब्दरूपावलि-सुगमधातुरूपावलि-धातुरूपनिदर्शन-दीपमालिका-हास्यविनोदवाटिकादीनि बहूनि पुस्तकान्यरचयत्। येषामध्ययेनकौशलेन अगणिता विद्यार्थिनः संस्कृताध्येतारश्च लाभान्विताः। संस्कष्तज्ञैश्च शिष्यैः मनीषिभिः 'संस्कष्तसेवासाधनाख्यो विशालोऽभिनन्दनग्रन्थो विरचितो वर्तते।

हन्त! ''जातस्य ध्रुवो मृत्युरिति''  को न जानाति। कमिह निष्ठुरः कालो विमुंचति! वार्धक्ये चतुरधिकधिविंशतिशततमे  मईमासस्य षड्विंशतिदिनाके गुरुरयं वासुदेवद्विवेदिशास्त्रिसंस्कृत-मिहिरोऽस्तंगतः। सकरुणमिदं वृत्तं श्रुत्वा विदुषां मनस्विनां शिष्याणां संस्कृतानुरागिणां च हृदयसागरे गगनचुम्बी करुणोत्तालतरंगः समुद्भूतः। एवम्प्रकारेण नवतिवर्षाणि यावत् सम्पूर्णमपि भारतवर्षं संस्कष्तरवेण  गुंजितमतिष्ठदिति नास्ति संशयः। यशस्वी द्विवेदिमहाशयौ यावज्जीवनं संस्कष्तप्रचारनिष्कामकर्मणा देशसेवामकरोत्। त्यागतपस्यौदार्यसद्गुणप्रतिमूर्तिना गुरुणा यः संस्कृतप्रदीपः प्रज्ज्वालितः, स सृष्टिपर्यन्तं निरन्तरं प्रकाशं तनिष्यतीति मन्ये। यद्यपि विश्वसमर्चितचरणयुगलो गुरुरद्य भौतिकशरीरेण नो विलोक्यते तथापि सर्वत्र कष्तज्ञशिष्याणां हृदयसरोवरे प्रफुल्लपुण्डरीकमिवाहं विभावयामि। यशश्शरीरो भवान् पुनरपि संस्कष्तरक्षणाय सम्भविष्यतीति मदन्तःकरणं ब्रवीति।।

मान्याः! स्पष्टमिदमस्ति बालानां साहित्यं बालसाहित्यमिति बालेभ्यः रचितं साहित्यं बालसाहित्यमिति वक्तुं शक्यते। बालाः दुरूहव्याकरणनियमशून्या भवन्ति, अतस्तेभ्यः सामान्यनियमानुकूला किन्तु न नियमशून्या, विभूषणशून्यापि शकुन्तलेव मनोहारिणी ज्ञानप्रदा चेतश्चमत्कारिणी रचना बालसाहित्यपदेनावगन्तव्या वर्तते। इदमेव महत्कार्यं कृतमाचार्यवासुदेवद्विवेदिशास्त्रिवर्यैरस्माकं गुरुवरैरिति समुद्घोषयामो वयं निर्भयम्। गुरुवरैः जनवरीमासस्य प्रथमे दिनांके 1969 ईस्वीये वर्षे बालसम्मेलनमायोजितमिति श्रूयतेऽस्माभिः।

विदितवेदितव्याः! आजीवनं संस्कृतं प्रचारयता गुरुणा बालानामवबबोधाय तेभ्यो बहूनि सरलानि पूस्तकानि विरच्य्य बालसाहित्यकोषबर्षद्धिर्विहिता। श्रूयन्तां बालेभ्यो रचितानि पुस्तकनामानि –

1 बालसंस्कृतम्
2 बालनिबन्धमाला
3 बालनाटकम्
4 बालविनोदमाला
5 बालसुभाषितम्
6 वर्णमालागीतावलिः
7 बालशब्दकोषः
8 बालकथामाला
9 बालकवितावलिः, प्रथमभागः।
10 बालकवितावलिः, द्वितीयभागः।

एतत्साहित्यं तु स्पष्टतया बालानां कृते आचार्यवरैः अस्मद्गुरुभिः वासुदेवदिवेदिशास्त्रिभिर्विरचिता। येषां परिशीलनेन साधारणबुद्धिरपि जनो ज्ञातुं शक्नोति यत् बालसाहित्यं कीदृशम्। मान्याः!

बालसाहित्यमिति धिया गुरुभिः कोमलमतीनां बालानां, येषां वयो नाधिकं षोडशवर्षेभ्योऽधिकं स्यादिति मन्तुं शक्यते तेषां कृते तेजसां हि न वयः समीक्ष्यते इति वचनेनापि ये स्वल्पवयस्कास्तेषां कथं संस्कृतज्ञानं सम्भवेदिति बुद्ध्या समग्रमपि एतत् बालसाहित्यं तैर्व्यरचि।

अस्यां विशालायां बालपरिषदि आचार्यचरणानां बालसाहित्यस्य सामान्यः परिचयो दीयमानो वर्तते।

प्रथमं बालसाहित्यं बालसंस्कृतम्– अस्मिन् पुस्तके तुकबन्दीरूपेण सर्वाण्यपि लकाराणि कारकाणि च हिन्दीसंस्कृतवाक्यैः परिगुम्फितानि वर्तन्ते, येषामध्ययनेन बालो मधुररीत्या संस्कृतक्षेत्रं प्रवेष्टुमर्हति।

द्वितीयं बालसाहित्यं बालनिबन्धमाला वर्तते, अत्र अत्यन्तमेव सरला ललिता संस्कृतनिबन्धा विलिखिता मनो मोहयन्तीवेति नास्ति संशयः।

तृतीयं बालसाहित्यं बालनाटकम्– आचार्यवासुदेवद्विवेदिनां दर्शनीयं बालनाटकं सम्पूर्णमपि संस्कृतजगदुपकरोति इति को न वेत्ति। अत्र दश लधूनि सरलानि बालचरित्रसमुपेतानि गुरुभिः विरचितानि नाटकानि सन्ति, यानि पठन् बालो नायको भवितुमर्हति।  दधिचौर्यम् इति नाटकांशं पश्यन्तु विज्ञाः। यथा–'

''गोपी– (कुपिता भूत्वा) आः अनेन बालकेन वयं नितान्तं व्याकुलाः जाताः स्म। एकस्मिन् गेहे गत्वा क्षीरं पिबति। अन्यस्मिन् गेहे गत्वा दधि भक्षयति। अपरस्मिन् गेहे गत्वा नवनीतं गष्ह्णाति। अन्यस्मिन् गेहे गत्वा पायसं भुङ्क्ते। इतरस्मिन् गेहे गत्वा तक्रघटं प्रलोकते। कदाचित् शिक्यस्थितं भाण्डमवतारयति।''[8]

श्रीकृष्णार्जुनीयम्, भीष्मप्रतिज्ञा, अभिमन्योः प्रयाणम्, अश्वमेधस्य तुरगः, श्रीकृष्णस्य दधिचौर्यम्, इति सुन्दराणि नाटकानि विलसन्तीव सहृदयकविहृदयानि हरन्ति। अत्रत्यः संवादः जटिलसंस्कृतवाक्यावलिमुक्तः सर्वथा गुरुवराणां नवीनां दषष्टिविन्यासमातनोति।

चतुर्थं बालसाहित्यं बालविनोदमाला वर्तते आचार्यवरवासुदेवद्विवेदिविरचिता। अत्र बालाानां मनोरंजनपूर्णाः कविताः लभ्यन्ते।

पंचमं बालसाहित्यं बालसुभाषितम् इति नाम्ना शास्त्रिवरै रचितम्, यत्र बालकेभ्यः शिक्षाप्रदाः श्लोकाः सानुवादं प्रदत्ता वर्तन्ते।

षष्ठं बालसाहित्यं वर्णमाला गीतावलिरपि बालसाहित्यमेव यत्र वर्णमालानुसारमेव संस्कृतशब्दाः क्रियाश्च लयबद्धाः संकलिता आचार्यचरणैरिति नूनमेव विदुषां मनो हरते।

सप्तमं बालसाहित्यं – बालशब्दकोषः– अत्र सूक्ष्मबुद्धिभिर्गुरुभिः तुकबन्दीरूपेण हिन्दीसंस्कष्तशब्दकोषो विरचितोऽस्ति, यो बालेभ्यो बहु रोचते। यथा

गष्ह मकान दरवाजा द्वार
भित्ति भीत दुनिया संसार।
रास्ता पथ सीढ़ी सोपान
राही पथिक सवारी यान।
कलम लेखनी पुस्तक पोथी
लेख लिखावट मुक्ता मोती।।

अष्टमं बालसाहित्यमाचार्यवासुदेवद्विवेदिशास्त्रिविरचितं बालकथामाला वर्तते, यत्र षोडश सन्धिसमासशून्याः कथाः सुन्दरीशकुन्तलासौन्दयराशिरवि सुकवीनाकर्षन्ति। अत्रत्या भाषा सुललितेयं श्रोतव्या। यथा

''इतः तस्मिन् एव समये श्रवणकुमारस्य मातापितरौ पिपासितौ जातौ। तदा स तयोः पिपासाशमनार्थं वारि आनेतुं तमसायाः तीरं जगाम। तदा स यदा जलाभ्यन्तरे प्रविष्टः जलपात्रं भर्तुं लग्नः तदा जले बुडबुडध्वनिः समुत्पन्नः। तं ध्वनिं श्रुत्वा दशरथः ज्ञातवान् यत् कश्चित् जलं पिबन् अस्ति।''[9]

संस्कृतप्रचाराभिलाषी गुरुर्न काठिन्यं पश्यति लिट्लकारप्रयोगेऽपि सकलशास्त्राणां रामायणादीनां प्रकृष्टज्ञानाबोधायेति।

कोमलमतयो बालाः प्रथमं संस्कृतप्रवेशं यथा कुर्युरिति विचिन्त्य आचार्यैः इयं मनोहररचना कृता। बालपात्रबहुलेयं दर्शनीया, येन बालाः रामकृष्णमहापुरुषादिसदृशा भवेयुरिति। दृढसंकल्पः ध्रुवः, भक्तराजः प्रह्लादः, गुरुभक्त आरुणिः, मातापितृभक्तः श्रवणकुमारः, मर्यादापुरुषोत्तमः श्रीरामः,

नीतिधर्मोपदेष्टा श्रीकृष्णः इत्यादिशीर्षकैः विरचितं बालसाहित्यमिदं नूनमेव भारतीयसंस्कृतिगौरवानुरूपं वर्तते। अन्येऽपि महापुरुषानाधष्य लिखिताश्चात्र निबन्धा बालसाहित्यं श्रीवृद्धिं कुर्वन्तीवेति सादरं वच्मि।

नवमं बालसाहित्यं बालकवितावलिः भागद्वये गुम्फिता यस्य हिन्दीनाम वर्तते हंसते– खेलते संस्कृतम्। अस्मिन् बालसाहित्यविख्यापके पुस्तके आधुनिकच्छन्दोबद्धा बालोपयोगिन्यः अत्यन्तमेव सरलसरससुमधुराः संस्कृतकविताः लभ्यन्ते, याः पाठं पाठं पंचवर्षदेशीयोऽपि बालो मोदमानो गृहांगणे नृत्यन् शोभते। श्रूयन्तां कवितांशा विश्रुतकविभिः। अस्य पुस्तकस्य प्रस्तावनां रचयन् विलिखति अमरगुरुकविराचार्यो वासुदेवद्विवेदिशास्त्री सद्गुरुर्यत् '

"इयं सर्वथा नवीना चेतोहरा प्रथमा रचना वर्तते,

अत्र नामानुरूपमेव विना परिश्रमं मनोरंजनेन साकं बालाः संस्कृतं जानीयुरिति धिया हंसते – खेलते संस्कृतं शिक्षेरन् इति दृष्ट्या एतादृश्यः रचनाः कृताः, यत्र पूर्वं संस्कृतवाक्यानि सन्ति तदनु तेषां तथैवानुवादोऽपि वर्तते। उभयोर्वाक्ययोः मेलनेन छन्दो भवति निर्मितम्।"[10]

आस्वादयन्तु बाला भूत्वा भवन्तः सुकवयः गुरुवरबालकवितावलिकाव्यरसमिति विचिन्तयन्नहं बालकविता आचार्याणां भवतां पुरतः प्रस्तौमि। यथा–

हे दयानिधे हे दयाधाम!
हे दयानिधे हे दयाधाम!
वीरा भवेम  हम वीर बने
धीराः भवेम हम धीर बने
शिष्टा भवेम हम शिष्ट बनें
सभ्याः भवेम हम सभ्य बनें।
सततं पठेम हम सदा पढ़ें
सततं लिखेम हम सदा लिखें
सत्यं वदेम हम सच बोलें
सुखिनो वसेम हम सुखी रहें।
तुभ्यं नमोऽस्तु तुमको प्रणाम
हे दयानिधे!  हे दयाधाम!11

अस्यां प्रार्थनायामाचार्यवरैः तत्सर्वमुक्तं यल्लघुबालानां कष्ते सामान्यतया समुपादेयमस्ति। सर्वप्रथममत्र प्रभुः प्रार्थितः, तदनु दूरदृष्टिमद्भिराचार्यैः पश्येम शरदः शतम् जीवेम शरदः शतम् श्रृणुयामः शरदः शतम् प्रब्रवामः शरदः शतम् अदीनाः स्याम शरदः शतम् इति वैदिकमन्त्रात्मिकी बालकविता सानुवादं विरचिता यया क्रीडन्तो बालाः सर्वमपि विज्ञातुं शक्नुवन्ति। धन्यो गुरुर्मे बुधवासुदेवः।

अभिलाषः इति नाम्नीकवितांशो हरते चित्तम्। यथा–

भूतले जमीन पर
पर्वते पहाड़ पर
उत्सवे उमंग में
संग्रामे जंग में।
सर्वतो वयं जयेम सब जगह विजय करें।
निर्भयः सदा भवेम सर्वदा निडर बनें।
नो कदापि वित्रसेम
त्रस्त हों नहीं कभी।
वीर–बालका वयम्
वीर बाल हम सभी।।[12]

बालसम्मेलनमंचमधिरुढाः विश्रुतकविमणयः! श्रूयतां सा बालकविता या उपजीव्यभूता सर्वानपि बालकवीनमुपकरोति मार्गमादिशति। सैषा सर्वजनजिह्वां पावयति, टप् टप् टप् इति शीर्षकाख्या आचार्यवासुदेवद्विवेदिगुरुवरलेखनीप्रसूता मनोहारिणी।

निपतति जम्बूः टप् टप्
गिरती जामून टप् टप्
बालः खादति गप् गप्
लड़का खाये गप् गप्
वायुः प्रवहति हर् हर्
हवा बह रही हर् हर्
पत्रं निपतति खर् खर्
पत्ता गिरता खर् खर्
विहगो  ब्रूते चुन् चुन्
चिड़िया बोले चुन् चुन्
भ्रमरो गुंजति गुन् गुन्
भंवरा गूंजे गुन् गुन्
गन्त्री गच्छति धक् धक्
गाड़ी जाती धक् धक्
बालः पश्यति टक् टक्
लड़का देखे टक् टक्।।[13]

अनेनैव प्रकारेण कोमलमतिबालविमोहनाय किं च संस्कष्तमयं वातारणसंरचनाय आचार्यवासुदेवमहोदयैः में में कुरुते, दिनचर्या, घटी, गन्त्री, चुन्नू–मुन्नू गोमातृ–चटका– विडाल–मूषिका– पिपीलिका–गोचारक–सूर्योदय–वर्षा–

नीतिशिक्षा– आचारशिक्षाप्रभष्तयो विरचिताः बालकविताः। याभिः न केवलं मनोरंजनमपितु बालोचितज्ञानमपि प्रदीयते। अहो दिव्या इमा बालकविता बालसाहित्यमभिवर्धयन्ति। सावधानम् इति शीर्षकेन लिखिता कविता श्रोतव्यास्ति–

कुसुमानां कलिका मा त्रोटय
फूलों की कलियां मत तोड़ो
पुस्तकस्य पत्रं मा मोटय
पुस्तक का पन्ना मत मोड़ो
वातायनशीशं मा स्फोटय
जंगले का शीशा मत फोड़ो
दुष्टैः सम्बन्धं मा योजय
दुष्टों से नाता मत जोड़ो
गच्छति शकटे मा आरोहेः
चलती गाड़ी में मत चढ़ना
चलतः शकटात् मा अवरोहेः
चलती गाड़ी से न उतरना
दुष्टैः पुरुषैः सह मा गच्छेः
दुष्टजनों के साथ न चलना।
कष्त्वा कर्म झटिति आगच्छेः
करके काम तुरत आ जाना।[14]

इमा न सामान्याः कविताः अपितु बालजीवननिर्माणसूक्तय इव वर्तन्ते, आसामभ्यासेन बालो बाल्यकालादेव मतिमान् सभ्यो नागरिको भविष्यतीति नास्ति सन्देहः।

बालसाहित्यानुरागिणः! देहात का चित्र इति शीर्षकेण अपूर्वा कविता आचार्यवरैः विलिखिता वर्तते, यत्र ग्राम्यजीवनं दरीदृश्यते।  केचिदंशाः प्रस्तूयन्ते चात्र।

यथा–

भारतग्रामवासिनो लोकाः
भारत के देहाती लोग
अशनं स्वल्पं खाना थोड़ा
मलिनं वसनम् गन्दा कपड़ा
शुष्कं वदनम् सूखा मुखड़ा
कथयति दुःखम् कहता दुखड़ा
ह्रस्वकुटीरम् छोटी कुटिया
भग्ना खट्वा टूटी खटिया
वक्रपट्टिका टूटी पहिया
रोदिति कन्या रोती बिटिया
करे तमाखुः सुर्ती कर में
कलहो  गेहे झगड़ा घरमें
चिन्ता हष्दये चिन्ता मन में
कष्शता देहे कष्शता तन में।[15]

मान्याः! न केवला कवितैषा, मानवहष्दयविदारिणी रचना राजनीतिरोटिकपाकदक्षानपि प्रेरयति विकासं कर्तुं ग्रामस्येति हष्दयीकुर्वन् आचार्यवरः प्रातस्स्मरणीयो वासुदेवद्विवेदिशास्त्रिमहोदयो विरचितवान् स्यादिति मन्मनो ब्रूते।

दशमं बालसाहित्यं बालकवितावल्या द्वितीयो भागो वर्तते। यत्र मनोहराणि नवानि बालोपयोगीनि गानानि लयबद्धानि विरचितानि विलसन्ति। यथा

मम बालपाठशाला
बहु शोभते विशाला
शिशवः पठन्ति यत्र
फलकेषु वर्णमालाः।
केचित् लिखन्ति बालाः
केचित् पठन्ति बालाः
कलयन्ति केऽपि पट्टे
फलकेषु अंकमालाः।।
खेलन्ति केऽपि खेलं
बाला मिथः सहेलम्।
निपतन्ति उत्पतन्ति
प्रपतन्ति चानुवेलम्।।
गायन्ति केऽपि गीतं
ददते च केऽपि तालम्।
रचयन्ति केऽपि बालाः
कुसुमेषु आलवालम्।।
कर्षन्ति केऽपि भूमिं
सिंचन्ति केऽपि मूलम्।
कष्तन्ति केऽपि सूत्रं
धुन्वन्ति केऽपि तूलम्।।[16]

अन्यच्च

सर् सर् सर् वहति समीरः
झर् झर् झंझाकालः।
घर् घर् वर्षति घनमाला
टप् टप् बिन्दुनिपातः।[17]

एकमस्ति वैशिष्ट्याचार्यवराणाम्, यत् न कदापि ते व्याकरणशून्यरचनापक्षधरा, न चैते सर्वथा संस्कृतनियमान् विहाय रचनापक्षमाश्रयन्ते। तेषां दृष्टिरपूर्वा, पूर्वं ते मनोरंजनेन साकं बालाः संस्कष्तं शिक्ष्यन्ते, तदनु शनैश्शनैः सर्वमपि समुपदिश्यते। अतः शास्त्राणां भारतीयसंस्कृताश्रितां संस्कृतिं रक्षन् आचार्यवासुदेवद्विवेदी शास्त्री अस्माकं प्रथमसंस्कृतगुरुरस्ति, येन समुपदिष्टं मार्गमनुसरामो वयम्। विशालं तेषां बालसाहित्यमत्र मयाल्पीयसि काले भवतां विमलशेमुषीमतां समक्षं समुपस्थापितं, कीदष्शमिदं मदुक्तमिति विभावयन्तु सहष्दया विचक्षणाः। गुरुवरं वासुदेवद्विवेदिशास्त्रिमहोदयं देवनिभं वन्दमानो निजां वाणीं समाप्नोमि। जयतु संस्कृतं जयतु बालसाहित्यम्। विजयन्तु बालसाहित्यसम्मेलनस्य धन्या आयोजकाः।

**सन्दर्भः**


5 तत्रैव
6 तत्रैव
7 तत्रैव
8 बालनाटकम्। सार्वभौमसंस्कष्तप्रचारसंस्थानम्। 38/110 हौजकटोरा, वाराणसी
9 बालकथामाला
10 बालकवितावलिः, प्रथमभागस्य आवश्यकनिवेदनरूपप्रस्तावनांशः।
11 बालकवितावलिः प्रार्थना,  प्रकाशकः सार्वभौमसंस्कष्तप्रचारसंस्थानम्,वाराणसी
12 तत्रैव अभिलाषः
13 तत्रैव गन्त्री
14 तत्रैव सावधान
15 तत्रैव  देहात का चित्र
16 तत्रैव बालकवितावलिः द्वितीयभागे।
17 तत्रैव



संस्कृतप्रवक्ता,
आदर्शवैदिकविद्यालयइण्टरकालिज,
नंगला–सिनौली,
बागपतम्, उत्तरप्रदेशः,

# प्रक्रियाकौमुदीग्रन्थस्य परिचयो महत्त्वञ्च

-डॉ. विभूतिनाथझा
सहायकोऽध्यापक:,
श्रीरामसुन्दरसंस्कृतविद्यापप्रतिष्ठानम्,
रमौली, विल्ववनम्, दरभंगा, बिहार:

भाषाया: सम्यग् ज्ञानाय व्यवहाराय च सर्वेषु देशेषु व्याकरणस्य प्रवृत्तिर्दृश्यते। तत्र भारतवर्षे व्याकरणावतार: प्राचीन:। यद्यपि वेदकालादारभ्य निर्विच्छिन्ना व्याकरणग्रन्थरचनापरम्परा विलोक्यते, तथापि नासाद्यते साम्प्रतं पाणिनिकृतामाष्टाध्या" या: प्राक्तन: कश्चिद् व्याकरणग्रन्थ:। अष्टष्वध्यायेषु द्वात्रिंशत्पादेषु प्रायेण चतु: सहस्र संक्ष्याकेषु च सूत्रेषु अष्टाध्यायीग्रन्थे सन्ति संस्कृतभाषा व्याकरण नियमा:।

तत्र कात्यायनो वार्तिककार: वार्तिकरूपेण तत्राष्टाध्यायी सूत्रेण प्रयोगाणां सिद्धयर्थं वार्तिकानि प्रणीतवान्। अत्र प्रसङ्गे प्रयोगा: पाणिनिव्याकण-प्रणेतृ-समये व्यवहारपथं नागता:, तेषां सिद्धयर्थं कानिचित् वार्तिकानि-प्रणीतानीति ऐतिह्यविद्भि: कल्पितानि।

प.युधिष्ठिर-मीमांसकास्तु पाणिने: शिष्यकोटौ कात्यायनं परिगणयन्ति। अस्तु यथाकथञ्चिात्।

सूत्रवार्तिकयो: व्याख्याता भगवान् भाष्यकार: पतञ्जलि:, एते त्रयो मुनयो व्याकरणाष्टकस्य प्रणेतार: व्याख्यातारप मुनित्रयशब्देनोच्यन्ते। एतेषामेव प्रामाण्यं वैयाकरणा: स्वीकुर्वन्ति। तदनु अष्टाध्यायी क्रममाश्रित्यैव वामनजयादित्यौ काशिका नामकं ग्रन्थं प्रणीतवन्तौ। तत्र काशिकामुपरि हरदत्तेन 'पदमञ्जरी' नामकं विवरणमतीव व्युतपत्त्याधायकं रचितम्। जिनेन्द्रबुद्धिना न्यास नाम्नी टीका विरचिता।

एवमष्टाध्यायीक्रमेण प्रवृत्ते व्याकरणे एकस्यैव प्रयोगस्य साधानायानेकाध्यायस्थानां सूत्राणामालोडने महत्कष्टमनुभूयात्यन्त दूयमानचेतस: प्रक्रिया प्रणालीमनुसरन्त एकत्रेवैकस्य प्रयोगस्य साधानाय सामान्यरूपेण सूत्राणामेकत्र पाठमवचित्य प्रकरण क्रमेण पठनपाठनपरम्परामाश्रितवन्त:।

ततश्च प्रक्रियाक्रमे प्रवर्त्तमाने सर्वत: प्राथम्येन वैयाकरण:-कस्चित् धार्मकीर्तिनामाख्यातो मनीषी 'रूपावतार:' ग्रन्थं व्यरचयत्। स च ग्रन्थ: पूर्वार्द्धोत्तरार्धा रूपेण भागद्वयमाश्रित्य वर्तते। तत्र पूर्वार्द्धस्य रूपावतार इति। नाम्ना ख्याति:। उत्तरार्द्धस्य च धातुप्रत्ययपञ्जिका इति तथा च स्वयमेवोत्तरार्द्धे स्व प्रतिज्ञायां ग्रन्थकृताऽभिहितम्-

ह्रप्रणम्य शिरसा देवीं बालानां हितकारिणीम्।
यथासारं प्रवक्ष्यामि धाातुप्रत्ययपञ्जिकाम्[1]।। इति।।

तत्र रूपावतारे बहुश: काशिकावृत्तेरनुसरणं विद्यते। काशिकावृत्तिश्च जयादित्यवामनाभ्यां पार्थक्येन भागश: निर्मितया: काशिकाया: निर्मितिर्नवतिशतके जातेतिसिद्धान्त ऐतिहासिकानाम्। नारायणभटकृत 'प्रक्रियासर्वस्वेऽपि रूपावतारस्यनामनिर्दिष्टमासीत्।' रूपावतारे च हरदत्त-जिनेन्द्रयो: पदमञ्जरीन्यासग्रन्थकत्रोर्नाम निर्देशो विद्यते। हेमचन्द्रकृतलिनिंुशासनेऽपि स्वोपज्ञविवरणे धार्मकीर्ते: रूपावतरस्य च नामनिर्देशोऽस्ति। हेमचन्द्रव्याकरणस्य रचनाकाल: द्वादशशताब्द्याम् जात, इति हैमव्याकरणादेव सप्तदशाध्यायस्थादवसीयते। एवमनेकप्रमाणै: रूपावतारस्यकाल: एकादशशताब्दी द्वादशशताब्द्या: पूर्वार्द्धो वा इत्यवसीयते।

प्रक्रियारत्नस्याप्युल्लेख: सायणकृत धातुवृत्तावलोक्यते। प्रक्रियासर्वस्वस्यापि नारायणभटकृतस्यकाल: 'रूपावतार:' प्रक्रियाकौमुद्योर्मध्यवर्त्तीति निश्चीयते। प्रक्रियाकौमुद्या: काल: भण्डारकररामकृष्णादिभि: पञ्चादशशतक इति निश्चीयते। प्रक्रियाकौमुदी रूपावतार कालयोराभ्यन्तरकाल एव प्रक्रियासर्वस्वस्य प्रक्रियारत्नस्य च काल इत्यविवादम्।

पञ्चादशरव्रीस्तशाताब्दस्य प्रथमे चरणे पाणिनीय व्याकरणोपासकेनाऽऽन्ध्रेण कौण्डिन्य गोत्रेण श्रीमदनन्ताचार्यप्रपौत्रेण नृसिंहपौत्रेण श्री कृष्णाचार्य पुत्रेण श्री राम चन्द्राचार्येण पाणिनीयमष्टाध्यायीमाधाारीकृत्य प्राक्तनसकलप्रक्रियाग्रन्थातिशायी "प्रक्रिया कौमुदी" इत्याख्यो विरचित: प्रक्रियाग्रन्थ:। यद्यपि नेह सकलानि सूत्राणि व्याख्यातानि, कानिचिच्च ग्रन्थसंक्षेपधिया समुज्झितानि तथापीयंकौमुदी कौमुदीव चिरकालाय प्रतीक्षमाणानां जिज्ञासुजनानां प्रह्लादाय प्राकल्पत्।

अपि चाब्धिामन्थनोत्थमुमुदकौमुदीववदियं प्रक्रियाकौमुदी व्याकरणग्रन्थाब्धिामन्थनोद्भूता कमपि अनुसन्धानग्रन्थमप्यतिशेते। इह महाभाष्य-काशिकादिग्रन्थै: सह रूपावतार-रुपमालामुग्धाबोधा-प्रभृतयोऽपि व्याकरणग्रन्था: पर्यालोचिता: सन्ति। पूर्वार्द्धोत्तरार्द्धेति दिशा द्विधाा विभक्तोऽयं ग्रन्थ:।

रामचन्द्राचार्येण प्रक्रियाकौमुद्यां प्राक्तनानां वैयाकरणानां मतानि न सर्वत्रनामग्रहणपूर्वकं पर्यालोचितानि। तत्रादित: कारक पर्य्यन्तं केचित् इति दिशा त्रयस्त्रिंशत् स्थलेषु, एके इतिरीत्या पटास्थलेषु उद्धृतानीतिकस्य वैयाकरणस्य सन्तीत्यवगमो न भवति। प्रकाशे तत्स्फोरणाय प्रयासो विहित:। दि्मात्रोदाहरणानिप्रदर्श्यन्ते-

(क) केचित्-

(1) गुणोप्यत्रेति केचित्। प्रेष:। प्रेष्य:। "प्रादूहोढोढ्येषैष्येषु" (वा.) (इति प्रक्रियाकौमुद्याम्)। अत्र केचिदिति स्फोरयति प्रकाशकार: 'अमुमेवार्थं दुर्गसम्मत्या २ढयति इति केचिदिति'।

(2) ख्या धातौ नेति केचित्। पुंख्यानम्।। "अनुनासिकात् परोऽनुस्वार:[2]" प्रक्रिया-कौमुद्यास्मिन् सूत्रे। अत्र केचिदिति स्फोरयति प्रकाशकार: 'भाष्यकारादन्य इति व्याचक्षते।'

(3) पूष्णो ङौ टिलोपोवेति केचित्। "हन्तेरत्पूर्वस्य[3]" प्रक्रिया कौमुद्यास्स्मिन् सूत्रे।

अत्र केचिदिति स्फोरयति प्रकाशकार:- 'केचिदिति दुर्गादय:'

(ख) एके-

(1) पदादय: पृथक् शब्दा इत्येके। "विभाषा ङिश्यो:[4]" प्रक्रिया कौमुद्यामस्मिन् सूत्रे।

अत्र 'एके' इति स्फोरयति प्रकाशकार:, तदाशयं च प्रकटयति-पदादय: पृथक् शब्दा इत्येके त्रिमुनिभिका:। पृथगनादेशभूतानि स्वतन्त्राण्यपि प्रातिपदिकानि सन्ति। तथा च कोष:। "पदङ्घ्रिश्चरणोऽस्त्रियाम् स्वान्तं ह्न्मानसं मन:"। निशश्च टाब्विभाषित:। एवमन्येऽपि यथाप्रयोगमुह्या:।

(2) 'आदन्तत्वाच्छसोनत्वाभाव इत्येके'। "आतो धातो:[5]" प्रक्रिया कौमुद्यास्स्मिन् सूत्रे।

अत्र प्रकाशे किमपिनोद्रमित्येतत् प्रसंगे।

(3) 'गौणत्वेऽप्यात्त्वं जश्शसोरौश्त्वं वेत्येके'। "अष्टाभ्य औश्[6]" प्रक्रिया कौमुद्यामस्मिन् सूत्रे।

इत्थं बहूनामाचार्याणां मतानि समीक्ष्याचार्यो रामचन्द्रेण प्रक्रिया कौमुदी विरचिता।

इयं हि प्रक्रिया कौमुदी बालव्युत्पत्तयेरामचन्द्राचार्येण संक्षिप्योद्रा। अत: पाणिनीयानि सर्वाणि सूत्राणि नैवेह व्याख्यातानि। वैदिकप्रक्रियायां केवलं चतुश्चत्वारिंशदेव सूत्राणि व्याकृतानि, अन्ते तेनेत्थं श्लोकितम्-

"आनन्त्यात् सर्वशब्दा हि न शक्यन्तेऽनुशासितुम्
बालव्युत्पत्तयेऽस्माभि: संक्षिप्योद्रा यथामति।।[7]"

अत: सुबन्तानां र्तिन्तानां चोभयेषां शब्दानां यथाक्रमं ज्ञानसम्पत्तये ग्रन्थोऽयं द्विधा विभज्यते-पूर्वार्द्ध:, उत्तरार्द्धश्चेति। तत्र पूर्वार्द्धे सुबन्तानां ज्ञानाय क्रमेण संज्ञा-सन्धि:, स्वादि:, स्त्रीप्रत्यया:, विभक्त्यर्था:, समासा:, तद्धितप्रत्ययाश्च निरूपिता:। यद्यप्यत्र सन्धिकार्यं सुबन्ततिङन्तयोरूपकारकम्, तथाप्यवरोहक्रमेण प्रवृत्तेऽस्मिन् ग्रन्थे सन्धे:पूर्वप्रदर्शनस्यावश्यकतया, सुबन्तेष्वेव सन्धि बहुलतया च पूर्वार्द्धे एव सन्धिप्रकरणस्यापि सक्विेश:। उत्तरार्द्धे तु भ्वादयो दशगणा:, ण्यन्तसक्तयङन्तयङ्लुगन्तादयश्च तिङन्ता: क्रमेण विवेचिता:। धातुभ्य एव विहित तया कृत्प्रत्यया अप्यत्रैव व्याख्याता:। अतएव तिङन्तकृदन्तप्रकरणयोरादानुभयत्र धातोरित्यधिकारसूत्रं पठितम्। अन्ते च केषाञ्चिद् वैदिकशब्दानां प्रक्रियाविशेषा अप्युपपादिता:।

आचार्यभटोजिदीक्षितस्य सिद्धान्तकौमुद्या: निर्माणात् प्रागेव रामचन्द्राचार्येण प्रक्रियाकौमुदीग्रन्थो लिखितो विद्यते। अत: प्रयोगानुसारि पाणिनिसूत्राणां सक्विेशे यादृशं काठिन्यं प्रक्रिया कौमुदीकारेण अनुभूतं न तथा सिद्धान्तकौमुदीकारेण महावैयाकरणभटोजिदीक्षितेन। महाकविना भारविना किरातार्जुनीये अधोलिखित: श्लोक: प्रतिपादितो, यथा-

"विषमोऽपि विगाह्यते नय:
कृततीर्थ: पयसामिवाशय:।
स तु विशेष तत्र दुर्लभ:
सदुपन्यस्यति कृत्यवर्त्म य:"[8]।।

अत: प्रक्रियाकौमुद्या: निर्माणे रामचन्द्राचार्यसमक्षं भटोजिदीक्षितापेक्षया एषा विचारणीया कठिना च समस्या आसीत् यत्कथमस्मिन् शास्त्रे संक्षेप: करणीय:? विधास्यमाने च संक्षेपे कथं सूत्राण्यत्र सङघटनीयानि? कानि ग्राह्याणि? कानि च पुन: परित्यजनीयानि? एवं च यानि ग्राह्याणि तेषां र्सघटने को हि क्रम आश्रयणीय इत्येतत् सर्वमतीव सूक्ष्मेक्षिकया विवेचितव्यमासीत्। अत: एतद् सम्यग् सुविचार्य आचार्यपादैरत्र या हि विषय प्रतिपादनपद्धति: सूत्रसङघटनशैली चाधिश्रिता, नूनं सा ग्रन्थकाराणां बुद्धिवैभवस्याद्भुतं प्रमाणमेवेति।

अष्टाध्याय्यां लौकिकानां शब्दानां व्युत्पादनाय सूत्राणि विरचयता भगवता पाणिनिना मध्ये-मध्ये वैदिकानामपि प्रयोगविशेषाणामन्वाख्यानाय तत्तसूत्राण्युपगूहितानि। तद्यथा लोके सामान्ये कर्मणि द्वितीया विधानाय कर्मणि द्वितीया[9]" इति सूत्रमुद्रम्, तद्व्यवहितोत्तरं वेदे यवाग्वा अग्निहोत्रं जुहोति" इत्यादिवाक्ये जुहोते: कर्मणि तृतीया वेति दर्शनाय "तृतीये च हो श्छन्दसि" इत्यपि सूत्रितम्। एवं हि सामान्येनोपसर्गाणां धातो: प्राक् प्रतिपादनाय ते प्राग्धातो:[10] इति सूत्रितम्। तत: परं वेदे "हरिभ्यां या ह्योक आ" इति वाक्ये तद्विपरीतं धाातो: परेऽप्युपसर्गाणां प्रयोगदर्शनाय "छन्दसि परेऽपि" इत्युक्तम्। इत्थमेवान्यत्र बहुत्र अनुष्ठितमिति शम्।

**संदर्भ**

1 धातुप्रत्ययपञ्जिकायाम् (मंगलाचरणे)
2 पा. सू. 8।3।4
3 पा. सू. 8।4।22
4 पा. सू. 6।4। 113
5 पा. सू. 6।4। 140
6 पा. सू. 7। 1।21
7प्रक्रियाकौमुद्यां सर्वान्ते (समाप्ते)
8 किरातार्जुननीयं, महाकवि भारविना
9 पा.सू.-3/2/2
10 पा.सू.-1/4/80

खादी वस्त्र ही नहीं, विचार है !
आदर्श ग्रामोद्योग समिति, दिल्ली
खादी वस्त्रों का विशाल भण्डार
✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल (रेडीमेड) ✪ रेशम साड़ी (रिल्ड) ✪ रेशम स्पन व रेडीमेड ✪ पोली खादी
सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।
खादी ग्रामोद्योग भवन
✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, (उ० प्र०)
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094
फोन:-0120-2631855, 9899334204

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीत: प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्त: निजपरित: जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्यो: प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयु: ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयु:। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखा: स्फुटै: अक्षरै: संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयु: हस्तलिखितछायाप्रतिलेखा: न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोध: व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचित: लेख: मासात् पूर्वम् एव प्रेषणीय:।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयु: ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयु:।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखा: पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीय:।

## शैशवाष्टकम्

शैशवं रोचकं शैशवं सौख्यदं
शैशवं मोददं शैशवं तोषदम्।
शैशवं मन्दिरं शैशवं पूजनं
नैकरूपं स्वतन्त्रं भजे शैशवम्।। 1

कोडमागत्य मातुश्शिशुर्मोदते
कीडति कीडको जायतेऽसौ तदा।
सर्वतन्तस्वतन्त्रं च तत्कीडनं
दर्शनीयं तदीयं शुभं शैशवम्।। 2

स्तन्यपानातुरं कीडनायोत्सुकं
नैजभाषां वदल्लोकभाषां स्मरत्।
मातरं शीघ्रमिच्छत्पुरस्तात्पुनः
रम्यमेतादृशं पावनं शैशवम्।। 3

दन्तहीनं तथा कान्तियुक्तं मुखं
नासिकैकातिलघ्वी च नेत्रद्वयम्।
कोमलौ द्वौ मिथस्तौ करौ कीडतः
केवलं शैशवे केवलं शैशवे।। 4

अल्पहासः पुना रोदनं चाधिकम्
अल्पखेला पुनस्तीव्रनिद्रा त्वरा।
स्वप्नमालोकयत्स्वापगीतं रटत्
कोमलं निश्छलं निर्मलं शैशवम्।। 5

तातमाकारयन् मातरं संस्मरन्
उच्चशब्दैर्लपन् हस्तयुग्मं किरन्।
लोकमालोक्य हासं दिशन् शब्दयन्
शोभनः शोभतेऽस्पष्टशब्दः शिशुः।। 6

प्रस्तराणां लघून् खण्डकान् खादितु–
मादिनं प्रांगणे चाटितुं यत्नवान्।
नैजसम्बन्धिनां कोडतो निर्गतः
सर्वतन्त्रस्वतन्त्रश्शिशुर्भ्राम्यति।। 7

सुप्रविष्टः कदाचित् शिशुर्मन्दिरे
देवातापूजनायोत्सुको दृश्यते।
सुन्दरं चन्दनं मस्तके लिम्पति
स्वादुभोज्योपभोगे भृशं तुष्यति।। 8

डॉ0हेमचन्द्रबेलवालः 'हिमांशुः'
संस्कृताध्यापकः
रा0उ0मा0वि0 घसाड,
पो0 विनायक (मुवानी)
जिला पिथौरागढ, उ0ख0
hemchandra12@gmail.com
9411708877, 8938027315

## दूरभाषाष्टकम्।

*अरविन्दः।

विना भोजनं पानकं वा कलत्रं
सुतं वा सुतां मित्रमैत्रीं च वित्तम्।
समर्थोह्यस्ति मन्ये प्रभो हन्त किन्तु
विना दूरभाषं मृतो मानवोह्ययम्।। 1
सदा रेलयाने बसे मार्गदेशे
मुदोद्यानके कानने पर्वते वा।
गृहे भोजने नृत्यकालेह्यपि सर्वो
विना दूरभाषं मृतो मानवोह्ययम्।।2
पचन्तीव पाकालये दत्तदृष्टिः
प्रिया फेसबूके सखे व्हाट्सपे वा।
अहो शर्करां सा क्षिपत्येव शाके
विना दूरभाषं मृतो मानवोह्ययम्।।3
निशीथे प्रभाते च मध्याह्नकाले
सुसायन्तने घण्टिका हन्ति कर्णौ।
परं नो जहातीव यन्त्रं कराभ्यां
विना दूरभाषं मृतो मानवोह्ययम्।।4
न कृत्येषु चित्तं मनो नार्चनायां
न भार्यारतिर्वा न पत्यू रतिर्वा।
न पुत्रो विनीतः सुता वा विनीता
विना दूरभाषं मृतो मानवोह्ययम्।।5
गुरुः पाठने वा वटुः शिक्षणे वा
क्विच्चाचालको वा क्वचित्पूजको वा।
हला हे हला हा हलो वा वदन् स
विना दूरभाषं मृतो मानवोह्ययम्।। 6
समक्षं स्थितो भाषते दूरगोह्यहं
प्रयातः सुदूरं सखे पार्श्ववर्ती।
कलौ वञ्चयन् जीवतीवेति नित्यं
विना दूरभाषं मृतो मानवोह्ययम्।।7
म्रियन्ते चलन्तश्चलन्त्यस्तु मार्गे
न किं दूरभाषानुरक्ताः सखायः।
अतो नैव वार्ता विधेया सदैव
विना दूरभाषं मृतो मानवोह्ययम्।।8
दूरभाषाष्टकं सर्वैः पठनीयं मनस्विभिः।
दुर्घटना भविष्यन्ति यस्य पाठैर्न निश्चितम्।।

## मनो मे नरीनृत्यते



–डा. संजयकुमारचौबे

प्रीतिलग्नं मनो मे नरीनृत्यते
चारुदृश्यं समन्ताद् दरीदृश्यते।
मद्यपानेन तृप्तिर्भवेत् कस्यचित्
हृत्पिपासा परं मे वरीवृध्यते।
प्रेमरुष्टा मयि प्रेयसी क्व गता
हन्त कं कं न चेतः परीपृच्छ्यते।
स्थापयामि स्वपादावधानादिह
वर्त्म शूलान्वितं मे वरीवृत्यते।
दूरमेत्यर्तिवल्लीं श्रितं मानसं
कोऽपि बन्धः परं तद् जरीगृह्यते।
प्रेमतापस्त्वयं वर्तते कीदृशः
भेषजेनापि नित्यं जरीजृभ्यते।
प्रेम्णि वादाद् विदूरे भवेः संजय!
सैव सम्बन्धसूत्रं वरीवृश्च्यते।

## बालः श्रवणं योजनायाः प्रकरणं संभागे नैव मण्डलेषु स्वीकृतं भविष्यन्ति

भोपाल। बालः श्रवणं योजनायाः प्रकरणम् सम्प्रति जिला स्तरे एव स्वीकृतं भविष्यन्ति। योजनायाः अंतर्गतम् एकस्य मासस्य स्थाने पञ्चदश दिवसेषु उपचारं प्रारम्भं भविष्यति। श्रवणः बाधिताः बालानां षड् लक्षं पञ्चाशत् सहस्रं रुप्यकाणां व्यये कॉकलियर इम्प्लान्ट कारयते। योजनायाः सरलीकरणे त्वरितं लाभं दातुं च अनावश्यकम् औपचारिकताः दूरीकरणाय लोकं स्वास्थ्यम् एवं परिवारं कल्याणं मंत्री श्री तुलसीराम सिलावटः योजनायाः सरलीकरणस्य आदेशः तत्कालं प्रसारितं करणस्य निर्देशः दत्तवान्।

मंत्री श्री सिलावटः उक्तवान् यत् राष्ट्रीयः बालः स्वास्थ्यं कार्यक्रमे स्वास्थ्यं परीक्षणस्य काले श्रवण बाधिताः बालान् कॉकलियर इम्प्लान्ट कृते चिन्हिताः क्रियते। एतेषां बालानां शासकीयः चिकित्सा महाविद्यालयः रीवा, इंदौरं, जबलपुरम् एवं शासकीयः जिला चिकित्सालयः जबलपुरं च शासनेन मान्यता प्राप्ताः चिकित्सा संस्थानेषु इम्प्लांट कारयते। कॉकलियर इम्प्लांट इत्यस्य पैकेज राशिः षड् लक्षं पञ्चाशत् सहस्रं रुप्यकाणि अस्ति, यस्यां राशिः पञ्च लक्षं विंशतिः सहस्रं रुप्यकाणि राष्ट्रीयः बालः स्वास्थ्यं कार्यक्रमेण प्रदायं क्रियते। शेषं द्वि सहस्रं रुप्यकाणि प्रकरणं स्वीकृतेः समये रोगिणं चिकित्सालयः आवागमनाय दीयते। एकं लक्षम् अष्टाविंशतिः सहस्रं रुप्यकाणि इम्प्लांट पश्चात् स्पीच थेरेपी कृते राज्यं शासनेन बालः श्रवणं योजनायां दीयन्ते।

योजनायां सम्प्रति प्रकरणं जिला स्तरात् स्वीकृतये संभागं स्तरे तकनीकी समितिं प्रेषयते। तकनीकी समितौ ईएनटी विशेषज्ञः विभागाध्यक्षः चिकित्सा महाविद्यालयः ईएनटी विभागं क्षेत्रीयः संचालकः, उप संचालकः संभागीयः कार्यालयेन प्रकरणस्य स्वीकृतिः प्रदानं क्रियते। मुख्यः चिकित्सा एवं स्वास्थ्यम् अधि कारिणा संबंधितः चिकित्सालयं कॉकलियर इम्प्लांट कृते स्वीकृतिः प्रसारिता क्रियते। अस्मिन् समयः अतीतः भवति। मंत्री श्री सिलावटः अनावश्यकं समयम् अल्पं करणाय निर्णयः नीतवान् यत् बालः श्रवणम् उपचारं योजनायाः प्रकरणानि अधुना जिला स्तरे एव तकनीकी समितिः नासिका, कर्णम्, ग्रीवा विशेषज्ञस्य अभिमतस्य पश्चात् प्रकरणस्य स्वीकृतिः प्रसारिता करिष्यति। एतेन बालः श्रवणं योजनायाः क्रियान्वयनं तीव्र गत्या भविष्यति च श्रवणः बाधिताः बालान् त्वरितम् उपचारं मिलिष्यति।

## राज्यपालया बुंदेलखण्डं विश्वविद्यालयस्य कुलपतेः त्यागपत्रं स्वीकृतम्

भोपाल। कुलाधिपतिः एवं राज्यपाला श्रीमती आनंदी बेन पटेलः महाराजा छत्रसालः बुंदेलखण्डं विश्वविद्यालयः, छतरपुरस्य कुलपतिः प्रो. प्रियव्रत शुक्लेन अद्य प्रस्तुतं त्यागपत्रं तत्कालं प्रभावात् स्वीकृतम्। महाराजा छत्रसालः बुंदेलखण्डं विश्वविद्यालयः, छतरपुरे नव कुलपतेः नियुक्तिः पर्यन्तं प्रो. के.एन. सिंह यादवः, कुलपतिः, अवधेश प्रताप सिंहः विश्वविद्यालयः, रीवा तस्य पदीयं दायित्वैः सह महाराजः छत्रसालः बुंदेलखण्डं विश्वविद्यालयः, छतरपुरस्य कुलपतेः पदस्य कार्यम् अपि संपादितं करिष्यन्ति।

।। श्रीः ।।

## दिव्यकुम्भो जयेद् भव्यकुम्भो लसेत्

*–डॉ अरविन्दकुमारतिवारी*

अखिलभुवनदर्शनीयप्रयागे शुभे तीर्थराजे चलन्मानवानां भजच्छम्भुनाम्नां मनोहारिरूपं वियल्लोकते।
धवलिमनिशि तारकानां समूहस्तु कुम्भद्युतिं प्रेक्ष्य लज्जाननः स्वावमानादहो खे न सन्दृश्यते मूर्छितः।
महितनिखिलदेववर्गः प्रयागे मनुष्यस्य रूपेण पश्यज्जनौघेऽत्र राराज्यमानो वियुक्तो न किं प्रीयते।
भुवि विरचितकल्पवासं बुधा देवतासिद्धगन्धर्वयक्षर्षिमुन्यादयः क्षीणरागादयो दग्धसंसारबीजा मुदा कुर्वते। 1

सुखदसलिलसङ्गमे सुप्रभाते निमज्जन्ति शंसन्ति भाग्यं दिने मोदमाना विदेहाः सदेहाः जना आदिनं सादरम्।
ऋषिमुनिजनसंस्कृतिर्भारतीयोद्भुता कुम्भमेलोत्सवे श्रीप्रयागे मनोमोददा कोविदैर्वन्दिता मानवैरर्चिता सर्वगा।।
नयनयुगललोकनीयः कलाग्रामलोको विचित्राकृतिं सन्दधानो जनैर्दत्तनेत्रो हृदाराध्यते भूरिशः कीर्त्यते।।
क्षपितदुरितयोगिनां श्रीप्रयागे महायोगिनो योगविद्योदधिं हन्त तीर्त्वा तपः कुर्वते साधवोऽसाधवो बान्धवाः।।2

शिशिरशिविर एकपादस्थितो दिव्यकान्तिस्तपस्वी विरक्तिं दधानो जगज्जालतः खिन्नचेता हरिं याचते दर्शनम्
ललितकलितविश्ववन्द्याभिराजेन्द्रमिश्रस्य कीर्त्या कवित्वेन शुक्लप्रयागोऽधुना शोभते कल्मषं भृज्ज्ते सज्जनान् शल्भते।।
अगणितशुभदिव्यविद्युत्प्रदीपच्छटा चन्द्रकान्तिं पराजित्य कुम्भे मुदा काशमानेव संक्षीबते रम्यकुम्भाङ्गना।
कवननिपुणविश्रुतानां कवीनां तु पीयूषवर्षेण काव्येन कुम्भाषिकेण तीर्थस्य भूरानतानन्दितादीप्यते।। 3

विबुधनिलयनाकलोकः प्रयागस्य शोभां समालोक्य सेर्ष्यो ध्रुवो जायते शून्यदेवः सवेगं नृरूपो मुहुर्वेपते।
वनिगृहिजनसृष्टदेवाकृतिं कुम्भलोके दधानो नरः स्नानशीलः पुनर्वन्द्यते दानहस्तै समालोकितश्चत्वरे।।
विबुधसदसि शास्त्रचर्चा श्रुतं नः पुनात्यत्र रम्ये मुनीनां प्रयागे सुखं राजते राजते सैकते श्रीमये भावये।
विमलविभवशङ्कराचार्यनागामनुष्यादिसंशोभितोऽयं प्रयागो जगद्वन्द्यमानोऽद्य सम्मोदते पीवरोऽप्यायते।।4

श्रुतिरवभुवि धार्मिकाः सङ्गमे तीर्थराजे सपुत्राः सभार्याः सभृत्या गृहादागतास्तन्वते कुम्भशोभामिमाम्।
बहुजनिकृतपुण्यराश्युदये स्नानमुग्धा हरिं सेवमाना जना मन्वते दर्शनं कुर्वतेऽहर्निशं चागतानां द्रुतम्।
ललितकलितसैकते दृश्यमेतत् क्वचिच्छ्रूयते नैव देशे विदेशेऽप्यहो घोष्यते दूरगैर्दूरजैर्दूरतः।।
विमलसरिति सिद्धकार्याः समोदं समायान्ति मज्जन्ति गायन्ति नृत्यन्ति कुम्भोत्सवे भारतीया जना वन्द्यवैदेशिकाः।5

चलति जगति सेव्यतां कुम्भतोयं हृदिस्थं श्रुतं कल्मषं क्षाल्यतां निर्मलो जायतां जायतां निर्मलः।
कनकरजतदानपुण्येन सेवादिकृत्येन दिव्यत्कवित्वेन सद्भाषणेनापि संवर्ततां कुम्भलोके जनः।
सुकृतजनितभाविजन्म प्रभूयात्प्रयागे शुभे कल्पवृक्षस्य मूले मुहुः काम्यतां काम्यतां सत्वरं वाञ्छितम्।।
विलसितशुभतीर्थराजेऽरविन्दस्तिवारी शिशुर्निर्मलो भूरिशो भाषते दिव्यकुम्भो जयेद् भव्यकुम्भो लसेत्।।6

# डॉ रामविनयसिंहप्रणीतः समीक्षात्मको ग्रन्थः 'आचार्यजानकीवल्लभशास्त्री का कवित्व' इति लोकार्पितम्

देहरादूनम्-गतनवम्बरमासे 2018 साहित्यकार डॉ रामविनयसिंहप्रणीतः समीक्षात्मको ग्रन्थः 'आचार्यजानकीवल्लभशास्त्री का कवित्व' इत्यस्य विमोचनं जातम्। अस्य पुस्तकस्य विमोचनसमारोहे मुख्यातिथित्वेन सम्भाषणमाणेन श्रीमता प्रकाशपन्तमहोदयेन कथितं यत् यदा शास्त्रिमहोदयाय पद्मश्रीपुरस्कारस्य घोषणा कृता तदा तेनोक्तं यत् समाजः सर्वकारश्च नो जानीतो यत् शास्त्री किं करोति। अतः एतादृशः पुरस्कारो मदर्थं व्यर्थमेवास्ति। श्रीपन्तमहोदयेन सम्भाषितं यत् शास्त्रिमहोदयस्य संस्कृतहिन्दीसेवा सदैव स्मरणीया भविष्यति।




डॉ सुधापाण्डेयः, देहरादूनतः श्रीप्रकाशपंतः ,माननीय मंत्री, वित्त एवं भाषा, उत्तराखण्ड, प्रोफेसर अभिराजराजेन्द्रमिश्रः , शिमलातः, डॉ संजयकुमारपंकजः, प्रसिद्ध गीतकार, मुजफ्फरपुर , लेखक डॉ रामविनयसिंहः, शायर शादाबअली,

विशिष्टातिथिः डॉ संजयकुमारपंकजो यो हि लोकप्रियो गीतकारो वर्तते तेनोक्तं यत् शास्त्री महोदयो विद्वान् आसीत्, यं श्रोतुं जनाः अभिलषन्ति स्म। डॉ बुद्धिनाथेन प्रोक्तं यत् रामविनयसिंहेन गुरुदक्षिणा प्रदत्तास्ति पुस्तकमिदं प्रणीय। पुस्तकस्य लेखकः शास्त्रिणः शिष्यः डॉ रामविनयसिंहः अवादीत् यत् पुस्तकेऽस्मिन् भवन्तो यथा शास्त्रिणं पश्यन्ति तथैवाहमपश्यम्।

अस्य समारोहस्य सारस्वतातिथयः प्रो अभिराजराजेन्द्रमिश्रमहोदया न्यगदन् यत् हिन्दीसाहित्यसम्मेलने शास्त्रिमहोदयेन साकं मम संगमो जातः। गीतपरम्परायां शास्त्रिणा कविता अरच्यन्त। हिन्दीक्षेत्रं प्रति प्रत्यावर्तनान्नायं संस्कृतस्य कालजयिरचनामकुर्वन्। पद्मश्रीलीलाधरजगुडीमहोदयेन कथितं यत् पत्रपत्रिकाद्वारा अहं शास्त्रिकविवरं जानामि। समारोहस्य अध्यक्षा डॉ सुधारानीपाण्डेया अवदत् यत् नवीन आयामो दत्तः श्रीशास्त्रिणा संस्कृते। अवसरेऽस्मिन् अनेके गणमान्या विद्वांस आगताः। सर्वैरपि भूरिशो वर्धापनानि डॉ रामविनयसिंहाय प्रदत्तानि।

# शान्तिः पारस्परिकं बन्धुत्वमं च भारतीय-संस्कृतेः मूलम्-मुख्यमंत्री श्रीकमलनाथः

भोपाल। मुख्यमंत्री श्री कमल नाथः उक्तवान् यत् पारस्परिकी एकता, साम्प्रदायिकी शान्तिः च बन्धुत्वम् एव भारतीया संस्कृतेः मूलम् अस्ति। सः उक्तवान् यत् विश्वे भारतम् एव केवलम् एतादृशं देशम् अस्ति यत्र एतावती विशालाः विविधताः सन्ति। जातयः, भाषाः तीज उत्सवाः सन्ति। एतेषां फलस्वरूपम् पारस्परिकम् एकता अस्ति। मुख्यमंत्री अद्य अत्र ताज उल मस्जिद प्रांगणे हज यात्रीणां कुरआ अंदाजी कार्यक्रमे सम्मेलितः भवितुं पश्चात् हज गम्यमानाः श्रद्धालून् संबोधितः कुर्वन् आसीत्।



मुख्यमंत्री उक्तवान् यत् भारतीयं समाजे भिन्नताः भवितुं फलस्वरूपं भारतं देशं त्रिवर्णस्य अधः एकतायां बद्धम् अस्ति। सः उक्तवान् यत् विश्वं भारतस्य केवला आर्थिकी शक्तेः नैव प्रत्युत् अत्रत्य अनेकतायाम् एकता, बन्धुत्वं च शान्तिः सदृशं मूल्यानां प्रशंसकः अस्ति। विश्वे एतद् एवं भारतस्य परिचयम् अस्ति। सः उक्तवान् यत् भारतस्य अनेकेभ्यः भागेभ्यः मुस्लिम भ्रातरः हज गमिष्यन्ति च यदा तत्र मिलिष्यन्ति तर्हि स्वकीयं भारतीयाः वदिष्यन्ति। एकतायाः एषा भावना एव भारतीया संस्कृतिं सुदृढ़ा करोति। सः उक्तवान यत् अस्माकम् एतद् परिचये प्रहारं कर्तुं प्रयासं क्रियते परं च अस्माकं स्वभावम् एतादृश्म् अस्ति यत् अस्माकं विचारधारायां कदापि दुर्विचारं नैव आगच्छति।

मुख्यमंत्री हज गम्यमानाः सर्वान् श्रद्धालून् शुभकामना शुभाशयाः च दत्तवान् च तेभ्यः प्रार्थनां कृतवान। सः उक्तवान् यत् हजस्य कृते वायुयानं सेवा प्रारम्भा करणस्य पूर्णं प्रयासं कारयिष्यते। केन्द्रं शासनेन अपि आग्रहं करिष्यामः।

अल्पसंख्यकं कल्याणं मंत्री श्री आरिफ अकीलः भोपालात् हजस्य कृते वायुयानं सेवायाः आवश्यकता वदन् अवदत् यत् यावन्तः जनाः हज गन्तुं इच्छन्ति तेभ्यः अवसरः मिलेत्। कार्यक्रमे हजरत सिराजुल हसनः, मुफ्ती अबुल कलामः, काजी सैयद मुश्ताक अली नदवी, काजी इशरत अली इंदौरं, नायब काजी बावर हसनः, काजी रियाज अहमदः, कारी अब्दुल हफीज, कारी जसीम दादः, मुफ्ती रईस अहमदः, विविधानां मण्डलानां काजी च हज गन्तुम् आवेदकाः उपस्थिताः आसन्।







उत्तरप्रदेशसंस्कृतसंस्थानेन प्रकाशितं बालसंस्कृतमतीव मनोहरं वर्तते। वर्धापनानि संस्थानाय येन महत्कार्यमनवरतं संस्कृतप्रचाराय सुरभारतीसंरक्षणाय च विधीयमामस्ति।




अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2018-20 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।